THE BOOK WAS DRENCHED

काण्व

संहिता।

UNIVERSAL
LIBRARY
OU_184411
UNIVERSAL
LIBRARY

OUP—390 29-1-72 10,000

OSMANIA UNIVERSITY LIBRARY

Call No. S294.1 Accession No. 5159

Author VAIS

Title शुक्लयजुर्वेदीयकाण्वसंहिता 1882,

This book should be returned on or before the date last marked below.

शुक्लयजुर्वेदीय

काण्व-संहिता ।

अनकवैदिकपण्डितानां साहाय्येन विविधप्राचीनलिखितपुस्तकपाठानुसारेण

भट्टाचार्येण श्रीपादशर्मणा दामोदरभट्टसूनुना सान्तवलेकरकुलजेन

संशोधिता ।

सा च

औन्ध राजधान्यां

भारतमुद्रणालये मुद्रयित्वा स्वाध्यायमण्डलद्वारा प्रकाशिता ।

विक्रमीय संवत् १९९७; शालीवाहनशकः १८६२

मूल्यं रूप्यकत्रयम् ।

मुद्रकः प्रकाशकश्च
वसन्त—श्रीपाद—सातवळेकरः (B. A. इत्युपपदधारी)
भारत-मुद्रणालयम्, औन्ध नगरे (सातारा-प्रदेशे) मुम्बई-प्रान्ते ।

ॐ

शुक्लयजुर्वेदीय–काण्वसंहितायाः

प्रस्तावः ।

शुक्लयजुर्वेदीयैषा संहिता काण्वसंहितेति प्रसिद्धा । सैषा मुद्राप्येदानीं प्रकाश्यते । तत्र ' कोऽयं काण्वः ? ' ' कोऽयं वा कण्वः ? ' इति प्रश्नः प्रथमं विचारभूमिकाया समुद्भवति । अस्मिन विषये केचिद्वदन्ति, यः कश्चिदृग्वेदीय–मन्त्राणां द्रष्टा कण्व स एवैतेषु यजुषां प्रवर्तकः कण्व ऋषिरिति, तेनैवैतस्य शुक्लयजुर्वेदस्य '**काण्व–यजुर्वेद**' इति संज्ञा समजनीति । नैतन्मतं सत्यमिव प्रतिभाति । कुत इति चेद् ब्रूमः—

ऋग्वेदे कण्वदृष्टा मन्त्राः ।

शाकलकेऽस्मिन्नृग्वेदे कण्वेन काण्वैश्च दृष्टा मन्त्राः प्रथमाष्टमनवमेषु मण्डलेषु बहवः सन्ति । तेषां सूक्तानां तत्रत्यानां मन्त्राणां च गणना भवतीदृग्विधा—

प्रथम--मण्डले

१ मेधातिथेः काण्वस्य

सूक्तक्रमाङ्क	मन्त्रसंख्या	देवता
१२	१२	अग्निः
१३	१२	,, (आप्रियः)
१४	१२	विश्वे देवाः
१५	१२	इन्द्रमरुदादयः
१६	९	इन्द्रः
१७	९	इन्द्रावरुणौ
१८	९	ब्रह्मणस्पत्यादयः
१९	९	अग्नामरुतः
२०	८	ऋभव
२१	६	इन्द्राग्नी
२२	२१	अश्विसवित्रादयः
२३	२४	वाय्वादयः
	(१४३)	

२ कण्वस्य घौरस्य

सू० क्र०	सू० मं० सं०	देवता
३६	२०	अग्निः
३७	१५	मरुतः
३८	१५	मरुतः
३९	१०	,,
४०	८	ब्रह्मणस्पतिः
४१	९	वरुणादयः
४२	१०	पूषा
४३	९	रुद्रादयः
	(९६)	

३ प्रस्कण्वस्य काण्वस्य

सू० क्र०	सू० मं० सं०	देवता
४४	१४	अग्निः
४५	१०	,,
४६	१५	अश्विनौ
४७	१०	,,
४८	१६	उषाः
४९	४	,,
५०	१३	सूर्यः
	(८२)	

[एवं प्रथमे मण्डले ३२१ काण्वमन्त्राः सन्ति]

❀

अष्टम--मण्डले

४ प्रगाथस्य काण्वस्य	१	२	इन्द्रः
मेधातिथिमेध्यातिथ्योः	१	२७	,,
मेधातिथेः काण्वस्य	२	४२	,,
५ मेध्यातिथेः ,,	३	२४	,,
६ देवातिथेः ,,	४	२१	,,
७ ब्रह्मातिथेः ,,	५	३९	अश्विनौ
८ वत्सस्य ,,	६	४८	इन्द्रः
९ पुनर्वत्सस्य ,,	७	३६	मरुतः
१० सध्वंसस्य ,,	८	२३	अश्विनौ
११ शशकर्णस्य ,,	९	२१	,,
प्रगाथस्य ,,	१०	६	,,
१२ वत्सस्य ,,	११	१०	अग्नि
१३ पर्वतस्य ,,	१२	३३	इन्द्र
१४ नारदस्य ,,	१३	३३	,,
१५ गोषूक्त्यश्वसूक्तिनोः काण्वयोः	१४-१५	२८	,,
१६ इरिम्बिठः काण्वस्य	१६-१७	२७	,,
,, ,,	१८	२२	आदित्यादयः
१७ सोभरेः ,,	१९-२२	९९	अग्न्यादय
मेधातिथेः ,,	३२	३०	इन्द्र.
मेध्यातिथे ,,	३३	१९	,,
१८ नीपातिथेः ,,	३४	१५	,,
१९ नाभाकस्य ,,	३९-४२	३८	अग्न्यादय
२० त्रिशोकस्य ,,	४५	४२	इन्द्रः
प्रगाथस्य ,,	४८	१५	सोमः
प्रस्कण्वस्य ,,	४९	१०	इन्द्रः
२१ पुष्टिगोः ,,	५०	१०	,,
२२ श्रुष्टिगोः ,,	५१	१०	,,
२३ आयोः ,,	५२	१०	,,
२४ मेध्यस्य ,,	५३	८	,,
२५ मातरिश्वनः ,,	५४	८	इन्द्रः
२६ कृशस्य ,,	५५	५	,,
२७ पृषध्रस्य	५६	५	,,
मेध्यस्य काण्वस्य	५७-५८	७	अश्विनौ, विश्वे देवाः
२८ सुपर्णस्य ,,	५९	७	इन्द्रावरुणौ
२९ भर्गस्य प्रागाथस्य ,,	६०-६१	३८	अग्नीन्द्रादयः
प्रगाथस्य ,,	६२-६५	४८	,,
३० कलेः प्रगाथस्य ,,	६६	१५	,,
३१ हर्यतस्य प्रगाथस्य ,,	७२	१८	अग्निः हर्वीषि वा
३२ कुरुसुतेः ,,	७६-७८	३३	,,
३३ कुसीदिनः ,,	८१-८३	२७	,,
सोभरेः ,,	१०३	१४	अग्निः

[एवमष्टमे मण्डले ९७३ काण्वमन्त्राः सन्ति ।]

नवम--मण्डले

मेधातिथेः काण्वस्य	२	१०	सोमः
मेध्यातिथेः ,,	४१-४३	१८	,,
कण्वस्य घोरस्य	९४	५	,,
प्रस्कण्वस्य काण्वस्य	९५	५	,,
पर्वतनारदयोः काण्वयोः	१०४--१०५	१२	,,

[एवं नवमे मण्डले ५० मन्त्रा काण्वदृष्टा. सन्ति]

एवं शाकलकेऽस्मिन्नृग्वेदे कण्वेन काण्वैश्च दृष्टा मन्त्रा सर्वे मिलित्वा १३४४ सन्ति । तत्र मन्त्रसंख्यानुपूर्व्या शतर्चिना महासूक्ताना क्षुद्रसूक्ताना च काण्वानां भवत्येवमनुक्रमः—

शतर्चिनः महासूक्ताः काण्वाः ।

१ मेधातिथेः काण्वस्य	प्रथमे मण्डले	१४३ मन्त्राः	
	अष्टमे ,,	९९ ,,	
	नवमे ,,	१० ,,	२५२
२ सोभरेः काण्वस्य	अष्टमे मण्डले		११३
३ कण्वस्य घोरस्य	प्रथमे मण्डले	९६	
	नवमे ,,	५	१०१
४ प्रस्कण्वस्य काण्वस्य	प्रथमे ,,	८२	
	अष्टमे ,,	१०	
	नवमे ,,	५	९७

अयं प्रगाथो घोरपुत्रः सन् कण्वस्य भ्रातुः पुत्रतां गतः । तथा च सर्वानुक्रमसूत्रम्—' **स घोरः सन्भ्रातुः कण्वस्य पुत्रतामगात्** ' इति ।

महासूक्ताः काण्वाः ।

५ प्रगाथस्य काण्वस्य	अष्टमे मण्डले				७१
६ मेध्यातिथेः	,,	,,	,,	४३	
,,	,,	नवमे	,,	१८	६१
७ वत्सस्य	,,	अष्टमे	,,		५८
८ इरिम्बिठेः	,,	,,	,,		४९
९ त्रिशोकस्य	,,	,,	,,		४२
१० ब्रह्मातिथेः	,,	,,	,,		३९
११ नाभाकस्य	,,	,,	,,		३८
१२ भर्गस्य प्रागाथस्य	,,	,,	,,		३८
१३ पुनर्वत्सस्य	,,	,,	,,		३६
१४ पर्वतस्य	,,	,,	,,		३३
१५ नारदस्य	,,	,,	,,		३३
१६ कुरुसुतेः	,,	,,	,,		३३
१७ गोषूक्त्यश्वसूक्तिनोः		,,	,,		२८
१८ कुसीदिनः काण्वस्य		,,	,,		२७
१९ सध्वंसस्य काण्वस्य	अष्टमे मण्डले				२३
२० देवातिथेः	,,	,,	,,		२१
२१ शशकर्णस्य	,,	,,	,,		२१

क्षुद्रसूक्ताः काण्वाः

२२ हर्यतस्य प्रगाथस्य		,,	,,	१८
२३ नीपातिथेः	,,	,,	,,	१५
२४ कलेःप्रागाथस्य	,,	,,	,,	१५
२५ मेध्यस्य	,,	,,	,,	१५
२६ पर्वतस्यनारदयोः काण्वयोः नवमे मण्डले				१२
२७ पुष्टिगोः काण्वस्य	अष्टमे मण्डले			१०
२८ श्रुष्टिगोः	,,	,,	,,	१०
२९ आयोः	,,	,,	,,	१०
३० मातरिश्वनः	,,	,,	,,	८
३१ सुपर्णस्य	,,	,,	,,	७
३२ कृशस्य	,,	,,	,,	५
३३ पृषध्रस्य	,,	,,	,,	५

काण्वमन्त्राणां सर्वयोगः १३४४

काण्वमन्त्राणां दैवतविभागाः ।

एतेषां काण्वमन्त्राणां दैवतानुसारेण विभागो भवत्येवंविध.

१ इन्द्रस्य	६४१ मन्त्रा.
२ अग्नेः	२३७
३ अश्विनो.	१४२
४ मरुता	७६
५ विश्वेषां देवाना	६९
६ सोमस्य	६५
७ उषस.	२०
८ ब्रह्मणस्पत्यादीना	१७
९ इन्द्रावरुणयोः	१६
१० सूर्यस्य	१३
११ इन्द्रमरुतादीना	१२
१२ प्राणः	१०
१३ ऋभूणा	९
१४ अग्नामरुतो	९
१५ इन्द्राग्न्योः	८

एतेषा सर्वयोगः १३४४

एतस्मादृग्वेदीयमन्त्रसमाम्नायात्काण्वदृष्टाच्छुक्लेऽस्मिन यजुर्वेदे संगृहीता मन्त्रा अल्पश एव सन्तीति द्रष्टव्यमिदानीम् । यथा—

मन्त्रः	ऋग्वेदस्थानं	वा० यजु०	काण्वयजु०
१ मेधातिथेः काण्वस्य मन्त्राः (२६)			
स नः पावक दीदिवो	१,१२,१०	१७,९	१८,१०
इन्द्रवायू बृहस्पति	१,१४,३	३३,४५	३२,४५
विश्वेभि सोम्यं मधु	१०	१०	१०
अभि यज्ञं गृणीहि नो	१,१५,३	२६,२१	—
द्रविणोदाः पिपीषति	९	२२	—
सोमानं स्वरणं कृणुहि	१,१८,१	३,२८	३,३६
यो रेवान्यो अमीवहा	२	२९	३७
मा नः शंसो अररुषो	३	३०	३८
सदसस्पति	६	३२,१३	३५,३२
या वा कशा मधुमती	१,२२,३	७,११	७,१०
हिरण्यपाणिमूतये	५	२२,१०	२४,१४
विभक्तारं हवामहे	७	३०,४	३४,४
अग्ने पत्नीरिहा वह	९	२६,२०	—
मही द्यौः पृथिवी चन	१३	८,३२	९,३१
		१३,३२	१४,३४
स्योना पृथिवि	१५	३५,२१	३५,५४
		३६,१३	३६,१३
इदं विष्णुर्विचक्रमे	१७	५,१५	५,२०
त्रीणि पदा विचक्रमे	१८	३४,४३	३३,३१

विष्णोः कर्माणि पश्यत	१९	६,४,	६,५,
		१३,३३	१४,३५
तद्विष्णोः परमं	२०	६,५	६, ६
तद्विप्रासो विपन्यवः	२१	३४,४४	३३,३२
वरुणः प्राविता भुवन	१,२३,६	३३,४६	३२,४६
अमूर्या उप सूर्ये	१७	६,२४	६,३५
अप्स्वन्तर	१९	९, ६	१०, ९
इदमापः	२२	६,१७	६,३२
आपो अद्य	२३	२०,२२	२२, ७
अचिक्रदद्वृषा	९,२,६	३८,२२	३८,२२
२ कण्वस्य घौरस्य मन्त्राः (४)			
सं सीदस्व महाँ असि	१,३६,९	११,३७	१२,३७
ऊर्ध्व ऊ षु ण ऊतये	१३	४२	४२
उत्तिष्ठ ब्रह्मणस्पते	१,४०,१	३४,५६	३३,४४
प्रैतु ब्रह्मणस्पतिः	३	३३,८९	
		३७,७	३७,७
३ प्रस्कण्वस्य काण्वस्य मन्त्राः (८)			
श्रुधि श्रुत्कर्ण	१,४४,१३	३३,१५	३२,१५
त्वा चित्रश्रवस्तमं	१,४५, ६	१५,३१	१६,५३
उभा पिबत	१,४६,१५	३४,२८	३३,२२
उदु त्यं जातवेदसं	१,५०,१	७,४१	८,२३
		८,४१	९,६
		३३,३१	३२,३१
अदृश्रमस्य	३	८,४०	८,२२
तरणिर्विश्वदर्शतो	४	३३,३६	३२,३६
येना पावक चक्षसा	६	३२	३२
उद्वयं तमसस्परि	१०	२०,२१	२२,६
		२७,१०	२९,१०
		३५,१४	३५,४७
		३८,२४	३८,२४
४ मेध्यातिथेः काण्वस्य मन्त्राः (३)			
इमा उ त्वा पुरूवसो	८,३,३	३३,८१	३२,८१
अयं सहस्र	४	३३,८३	३२,८३
अस्येदिन्द्रो वावृधे	८	९७	—
५ वत्सस्य काण्वस्य मन्त्राः (४)			
महाँ इन्द्रो य ओजसा	८,६,१	७,४०	७,४०
उपह्वरे गिरीणा	२८	२६,१५	—
त्वमग्ने व्रतपा असि	८,११,१	४,१६	४,११
आ ते वत्सो मनो यमत	७	१२,११५	१३,११४
६ गोषूक्त्यश्वसूक्तिनोः काण्वयोः मन्त्रः (१)			
अपां फेनेन नमुचेः	८,१४,१३	१९,७१	२१,७१
७ सोभरेः काण्वस्य मन्त्राः (३)			
भद्रो नो अग्निराहुत	८,१९,१९	१५,३८	१६,६०
भद्रं मनः कृणुष्व	२०	३९	६१
येना समत्सु	,,	४०	६२
(अत्र मन्त्राणां व्युत्क्रमो दृश्यते यजुर्वेदे)			
८ नाभाकस्य काण्वस्य मन्त्रौ (१)			
अस्तभ्नाद्द्यामसुरो	८,४२,१	४,३०	४,४२
९ त्रिशोकस्य काण्वस्य मन्त्रः (२)			
आ घा ये अग्नि	८,४५,१	७,३२	७,३१
बृहन्निदिध्म	२	३३,२४	३२,२४
१० प्रगाथस्य घौरस्य काण्वस्य मन्त्रौ (२)			
त्वं सोम पितृभि	८,४८,१३	१९,५४	२१,५४
अस्मे रुद्रा	६३,१२	३३,५०	३२,५०
११ श्रुष्टिगोः काण्वस्य मन्त्रौ (२)			
कदा चन स्तरीरसि	८,५१,७	३,३४	३,४२
		८,२	८,१
यस्यायं विश्व आर्यो	९	३३,८२	३२,८२
१२ आयोः काण्वस्य मन्त्रः (१)			
कदा चन प्रयुच्छसि	८,५२,७	८,३	८,२
१३ भर्गस्य प्रागाथस्य मन्त्रः (१)			
पाहि नो अग्न एकया	८,६०,९	२७,४३	—
१४ हर्यतस्य प्रागाथस्य मन्त्रौ (२)			
गाव उपावत	८,७२,१२	३३,१९	३२,१९
		७१	७१
आ सुते	१३	२१	२१
१५ कुरुसुतेः काण्वस्य मन्त्रः (१)			
उत्तिष्ठन्नोजसा सह	८,७६,१०	८,३९	८,२१
१६ कुसीदिनः काण्वस्य मन्त्रः (१)			
अधि न इन्द्रैषा	८,८३,७	३३,४७	३२,४७

एवं द्विषष्टिर्मन्त्राः काण्वैर्दृष्टाः शुक्लेऽस्मिन् वाजसनेयके यजुर्वेदे संगृहीता दृश्यन्ते। काण्वे यजुर्वेदे तु षट्पञ्चाशदेव मन्त्रा दृश्यन्ते। मेधातिथेः २६, कण्वस्य ४, प्रस्कण्वस्य ८, मेध्यातिथेः ३, वत्सस्य ४, सोभरेः ३, श्रुष्टिगोः २, अन्येषां द्वादश। एवं सर्वे मिलित्वा द्विषष्टिर्भवन्ति। ऋग्वेदे शाकलके काण्वदृष्टा मन्त्रा १३४४ सन्ति। तेषां मध्यात् केवलं ६२ मन्त्रा एवास्मिन्

शुक्ले यजुषां वेदे संगृहीता दृश्यन्ते । काण्वयजुर्वेदे तु ततोऽपि न्यूना एवेति । अतो वेदस्यैतस्य काण्वयजुर्वेदेति नाम करणं काण्वदृष्टमन्त्रहेतुमूलकमिति मतं नैव परिपुष्यति, तत्र काण्वदृष्टमन्त्राणामल्पीयस्त्वात् । पुनश्च शुक्लयजुर्वेदस्य वाजसनेयी-माध्यंदिन-संहितायामप्येषामेव मन्त्राणा संग्रहो दृश्यते । तथैव तैत्तिरीयादिष्वपि संहितास्वेवमेवैतेषां मन्त्राणां किंचिन्न्यूनतर संग्रहोऽस्ति । अतो नैतत्काण्वसंहितायाः विशेषत्वं, येनैतस्याः संहिताया एतदभिधानं संभवेत् । अतो मिथ्यैवैषा कल्पना यत्काण्वानां मन्त्राणां संग्रहादेतदभिधानमस्य वेदस्येति ।

पुनश्च ऋग्वेदादस्मिन् शुक्लयजुर्वेदे ७०३ मन्त्राः संगृहीतास्तत्र काण्वानां मन्त्राः केवलं द्वाषष्टिरेव । अन्ये च ६४१ मन्त्रा अन्येषामृषीणां सन्ति । अतोऽल्पीयस्त्वात्काण्वमंत्राणां नैषा संज्ञा तन्मूलिकेति स्पष्टं भवति ।

ऋग्वेदीयानां काण्वमन्त्राणां मननम् ।

मा भून्नाम काण्वसंहितेत्यभिधानमस्याः संहितायास्तत्र काण्वदृष्टमन्त्राणामल्पीयस्त्वात् । तथापि काण्वसंहिताविषये प्रचलिते सति, काण्वानामृग्वेदीया मन्त्राः सूक्ष्मया बुद्ध्यावश्यं मननीया, इत्यत्र न किंचिदपि मतद्वैधं भवितुं शक्यमिति प्रतीयते । यतस्तेषु मन्त्रेषु कण्वकुलागताचारा ये के चापि समुपलभ्येरंस्तेषां समालोचनया कण्वविषयकं ज्ञानं बहु वाल्पं वा भवितुं शक्यमिति कृत्वा, ऋग्वेदीय-काण्वदृष्टमन्त्राणा मननं यावच्छक्यमत्रोपक्रमामः ।

१ काण्वानां सभा ।

ऋग्वेदे प्रस्कण्वस्य काण्वस्याश्विदेवत्ये मन्त्रे काण्वानां काचित् प्रिया सभा दृश्यते प्रशंसिता, यथा—

शश्वत्कण्वानां सदसि प्रिये हि कं सोमं पपथुरश्विना । (ऋ० १।४७।१०)

'हे अश्विनौ ! कण्वानां प्रिये सदसि सोमयागमण्डपे शश्वत्सर्वदा सोम पपथुर्हि कं, युवा पीतवन्तौ खलु ।' एतदेवान्यस्मिन्मन्त्रे दृश्यते, यथा—

पिबाथो अश्विना मधु कण्वानां सवने सुतम् । (ऋ० ८।८।३)

अश्विस्तवे सध्वंसस्य काण्वस्य दर्शनमेतत् । कण्वाना सोमयागेऽश्विनौ मधु मधुरं सोमं पिबाथः पिबतम् । तथा च शशकर्णः काण्वोऽश्विप्रशंसायामाह—

इमे सोमासो अधि तुर्वशे यदौ इमे कण्वेषु वामथ । (ऋ० ८।९।१४, अथर्व २०।१४१।४)

'यथा तुर्वशे यदौ वा युवयोरर्थे संस्कृताः सोमास आसन्, तथैव कण्वेषु वा युवाभ्यां दत्ता इमे सोमाः सन्तीति ।' एवं कण्वानां यज्ञसभायां सोमाभिषवो मन्त्रेषु स्तूयते, तथाहि—

२ कण्वानां सोमसवनम् ।

कण्वानां सोमाभिषवं प्रस्कण्वः काण्वोऽग्निस्तुतौ वर्णयति यथा—

कण्वासस्त्वा सुतसोमास इन्धते हव्यवाहं स्वध्वर । (ऋ० १।४४।८)

'हे स्वध्वराग्ने ! सुतसोमासः कण्वासो हव्यवाहमग्निं त्वा त्वामिन्धते दीपयन्ति ।' तथैव स एवर्षिरश्विसंस्तवे प्रस्तौति ।

कण्वासो वां सुतसोमा अभिद्यवो युवां हवन्ते अश्विना । (ऋ० १।४७।४)

'हे अश्विनौ ! वां युष्मदर्थं सुतसोमा अभिषुतसोमयुक्ता अभिद्यवोऽभिगतदीप्तयः कण्वासो युवामुभौ हवन्ते आह्वयन्ति ।' एवं कण्वानां सोमाभिषवो मन्त्रेषु वर्णितो दृश्यते ।

३ कण्वानां यज्ञसाधनम् ।

वत्सः काण्व इन्द्रस्तवे कण्वानां यज्ञसाधनं दर्शयति, तद्यथा—

कण्वा इन्द्रं यदक्रत स्तोमैर्यज्ञस्य साधनम् । जामि ब्रुवत आयुधम् । (ऋ०८।६।३): (अथर्व०२०।१३८।२)

'कण्वाः स्तोमैर्यज्ञस्य साधनमक्रतेति ।' कण्वा यज्ञं कृत्वा समाराधयन्तीन्द्रमिति द्रष्टव्यमत्र ।

४ कण्वा आ हवन्ते ।

नीपातिथिः काण्वो दर्शयतीन्द्रस्तवे कण्वैः कृतं देवतानामाह्वनम्—

' आ त्वा कण्वा इहावसे हवन्ते वाजसातये । (ऋ० ८।३४।४)

' कण्वा त्वामिहावसे वाजसातये चाहवन्ते आह्वयन्ति यज्ञार्थं च तुभ्यं ब्रह्म कृण्वन्ति ।

५ कण्वा ब्रह्म कृण्वन्ति ।

यज्ञसाधने दक्षा कण्वा ब्रह्म सूक्तं कृण्वन्तीति मेधावी प्रस्कण्वः काण्वोऽश्विनोः प्रस्तावे कथयति यथा–

कण्वासो वां ब्रह्म कृण्वन्त्यध्वरे तेषां सु शृणुतं हवम् । (ऋ० १।४७।२)

' कण्वा वामश्विनोर्युवयोर्यागे ब्रह्म स्तोत्ररूपं मन्त्रसमूहं कृण्वन्ति कुर्वन्ति । तत्तु यागेऽध्वरे गीयते । तेषां कण्वानां हवमिममाह्वानं शृणुतामिति । ' इन्द्रस्तवे वत्सः काण्वोऽप्येवमेवाह—

इमां सु पूर्व्यां धियं मधोर्घृतस्य पिप्युषीम् । कण्वा उक्थेन वावृधुः ॥ (ऋ० ८।६।४३)

' कण्वा उक्थेन सूक्तेन प्रशंसयेन्द्रं वावृधुः । इन्द्रस्य माहात्म्यं विस्तारितवन्तः । ' तथैव मेधातिथिः काण्व इन्द्रस्तवे तदेव कथयति–

प्र कृतान्यृजीषिणः कण्वा इन्द्रस्य गाथया । मदे सोमस्य वोचत ॥ (ऋ० ८।३२।१)

कण्वा इन्द्रस्य प्रशंसा गायन्तीति ।

६ कण्वा ईडते ।

कण्वा देवता ईडते । कण्वानामेतदीडनं मेधातिथिः काण्वो वैश्वदेवसूक्तेऽग्निस्तवे वर्णयति, तथाहि—

ईळते त्वामवस्यवः कण्वासो वृक्तबर्हिषः । हविष्मन्तो अरंकृतः ॥ ५ ॥
तान्यजत्राँ ऋतावृधोऽग्ने पत्नीवतस्कृधि ॥ ७ ॥ (ऋ० १।१४।५, ७)

' अवस्यव कण्वा अग्निं देवमीळते, तान्कण्वानग्निः पत्नीवतः पत्नीयुक्तान्करोतिविति । कण्वो घौरस्तथैवाग्निस्तवेऽग्निं प्रज्वालयति मेध्यातिथिरिति कथयति—

यं कण्वो मेध्यातिथिर्धनस्पृतम् ॥१०॥ यमग्निं मेध्यातिथिः कण्व ईध ऋतादधि ॥११॥ (ऋ० १।३६।१०,११)

' यमग्निं धनस्पृतं मेध्यातिथिः कण्व ईधे । ' पुनर्वत्सः काण्वो मरुतां स्तवे तदेव दर्शयति—

सहो षु णो वज्रहस्तैः कण्वासो अग्निं मरुद्भिः । स्तुषे हिरण्यवाशीभिः । (ऋ० ८।७।३२)

' कण्वा अग्निं स्तुवन्ति वर्णयन्ति, स्तोत्रं गायन्ति । ' तथा—

७ कण्वा गीर्भिरहूषत ।

तां त्वामुषर्वसूयवो गीर्भिः कण्वा अहूषत । (ऋ० १।४९।४)

उषःस्तवे प्रस्कण्वः काण्वो वर्णयति यत्तां ' त्वा वसूयवो धनकामाः कण्वा गीर्भिरहूषत स्तुतवन्तः ' मेधातिथिः काण्वोऽपि तथैव वैश्वदेवस्तवेऽग्नेः प्रशंसायामाह—

आ त्वा कण्वा अहूषत । (ऋ० १।१४।२)

तथैव ब्रह्मातिथिः काण्वोऽपि संस्तवेऽश्विनोः कथयति—

स्तुषे कण्वासो अश्विना । (ऋ० ८।५।४)

वत्सः काण्वोऽपीन्द्रप्रस्तावे तथैव शंसति—

अभि कण्वा अनूषतापो न प्रवता यतीः । इन्द्रं वनन्वती मतिः ॥ (ऋ० ८।६।३४)

' इन्द्रं कण्वा अनूषत, तेषां मतिरिन्द्रमेव गच्छति स्तुतिरूपेण, यथाऽऽपोऽधस्तात्समुद्रं गच्छन्ति तथेति भावः । '

८ कण्वस्य सुष्टुतिः।

कण्वकृता देवस्येन्द्रस्य शोभना स्तुतिः सुष्टुतिरिति कथ्यते। नीपातिथिः काण्व इन्द्रस्य संस्तवे कण्वकृता सुष्टुतिमिन्द्रः शृणोत्विति प्रार्थयते, यथा—

एन्द्र याहि हरिभिरुप कण्वस्य सुष्टुतिम्। (ऋ० ८।३४।१)

तदेव कण्वो घौरो मरुतां प्रस्तावेऽप्रार्थयत—

क्रीळं वः शर्धो मारुतमनर्वाणं रथेशुभम्। कण्वा अभि प्र गायत॥ (ऋ० १।३७।१)

'कण्वा मरुतां शर्धो बलं प्रशंसन्तीति भावः।' मेधातिथिः काण्वोऽपि तथैवेन्द्रस्तवे कथयति—

कण्वासो गात वाजिनं (इन्द्रं)। (ऋ० ८।२।३८)

मेध्यातिथिः काण्वोऽपि तदेव द्रढयति, यथा—

वयमु त्वा तदिदर्था इन्द्र त्वायन्तः सखायः। कण्वा उक्थेभिर्जरन्ते॥ (ऋ० ८।२।१६), (अथर्व० २०।१८।१)

कण्वासस्त्वा ब्रह्मभिः स्तोमवाहस इन्द्रा यच्छन्त्या गहि॥ (ऋ० ८।४।२), (अथर्व० २०।१२०।२)

देवातिथिः काण्व इन्द्रस्तवे कथयति, 'यत्कण्वा, हे इन्द्र! त्वां स्तोमवाहसः स्तोमानां वोढारो ब्रह्मभिः सूक्तैः सहायच्छन्ति, आगच्छन्ति, त्वां प्राप्नुवन्ति।'

९ कण्वा मतिं वर्धयन्ति।

कण्वा इन्द्रसंबंधिनीं मतिं प्रशंसामर्यां वर्धयन्तीति वत्सः काण्व इन्द्रस्तवेऽपश्यत्—

त्वामिच्छवसस्पते कण्वा उक्थेन वावृधुः। त्वां सुतास इन्दवः॥ २१॥

कण्वास इन्द्र ते मतिं विश्वे वर्धन्ति पौंस्यम्। उतो शविष्ठ वृष्ण्यम्॥ ३१॥ (ऋ० ८।६।२१,३१)

१० भयभीतः कण्वः।

कण्वो घौरो मरुतां प्रस्तावे भयभीतं कण्वमपश्यत्, तथा हि—

गन्ता नूनं नोऽवसा यथा पुरेत्था कण्वाय बिभ्युषे। (ऋ० १।३९।७)

'पुरा नोऽवसा रक्षणेन निमित्तेन यूयं यथा प्राप्तवन्तः। इत्थानेन प्रकारेण बिभ्युषे भीतियुक्ताय कण्वाय तदनुग्रहार्थं नूनं क्षिप्रं गन्त प्राप्नुत।' भयभीतः कण्वो मरुतां प्रसादेन भयरहितो भवत्विति प्रार्थनाहेतुरत्रावगम्यते।

११ कण्वस्यावनम्।

कुत्स आङ्गिरस आश्विसंस्तवेऽश्विभ्यां कण्वस्यावनं कृतमित्यपश्यत। यथा—

याभिः कण्वं प्र सिषासन्तमावतम्। (ऋ० १।११२।५)

प्रस्कण्वः काण्वोऽपि तदेवापश्यत—

याभिः कण्वमभिष्टिभिः प्रावतं युवमश्विना।

ताभिः ष्वऽस्माँ अवतं शुभस्पती पातं सोममृतावृधा॥ (ऋ० १।४७।५)

ब्रह्मातिथिः काण्वोऽपि तथैवाह—

यथा चित्कण्वमावतं प्रियमेधमुपस्तुतम्। (ऋ० ८।५।२५)

पुनर्वत्सः काण्वोऽपि मरुतां स्तवे तथैवाह—

येन कण्वं धनस्पृतम् (अव)। (ऋ० ८।७।१८)

सध्वंसः काण्वोऽपि तथैवाहाश्विस्तवे—

याभिः कण्वं मेधातिथिं (अवतं) (ऋ० ८।८।२०)

' कण्वपुत्रं मेधातिथिमृषिं याभिरूतिभिरन्नसाधनैरवतम् । ' एतत्प्रस्कण्वः काण्वोऽपि कथयतीन्द्रस्तुतौ-

यथा प्रावो मघवन् मेध्यातिथिं यथा नीपातिथिं धने ॥ ९ ॥

यथा कण्वे मघवन् त्रसदस्यवि यथा पक्थे दशव्रजे ॥ १० ॥ (ऋ० ८।४९।९-१०)

' हे मघवन् ! त्वं मेध्यातिथिं नीपातिथिं च धने हिते युद्धे प्रचलिते प्रावः, तथैव काण्वं त्रसदस्युं पक्थं दशव्रजमपि प्रावस्तथैवास्माकमपि रक्षणं कुर्विति प्रार्थना । ' एतदेव वसिष्ठपुत्रो मृळीकोऽग्निप्रस्तावे कथयति —

अग्निः ... प्रावन्न कण्वं त्रसदस्युमाहवे । (ऋ० १०।१५०।५)

' अग्निराहवे कण्वं त्रसदस्युं च प्रावन् रक्षितवान् । ' तथा चाथर्ववेदेऽपि मित्रावरुणसंस्तवे ऋषिर्भृगुर कथयति—

यौ कक्षीवन्तमवथः प्रोत कण्वम् ॥५॥ यौ मेधातिथिमवथो० ॥६॥ (अथर्व० ४।२९।५—६)

' मित्रावरुणौ कक्षीवन्तं कण्वं मेध्यातिथिं चावथ ' इति भाव । एवं कण्वानामवनं कृतमिन्द्रादिभिरिति सिद्ध्यति ।

१२ कण्वाय दानम् ।

कण्वो घोरोऽग्निस्तवे पश्यति यत्—

अग्निः कण्वाय सौभगम् । (ऋ० १।३६।१७)

' अग्निः कण्वाय सौभगं शोभनं धनं प्रायच्छदिति ' शेष । मरुता स्तवे स एवर्षिस्तथैवावोचत—

कण्वं दद प्रचेतसः । (ऋ० १।३९।९)

' हे प्रचेतसो मरुत । यूयं कण्वं दद धनं दत्तवन्त । ' तथा च व्रह्मातिथि काण्वोऽश्विसंस्तवे दृष्टवान् यथा—

युवं कण्वाय नासत्यापिरिप्ताय हर्म्ये । शश्वदूतीर्दशस्यथः ॥ (ऋ० ८।५।२३)

' हे नासत्यौ ! युवं कण्वायापिरिप्ताय परितप्तायोतीर्दशस्यथ , विविधानि रक्षणानि दत्तवन्तौ । ' तथा मेधातिथिः काण्व इन्द्रस्तवे कथयति—

कण्वेभिर्धृष्णवा धृषद्वाजं दर्षि सहस्रिणम् । (ऋ० ८।३३।३, अथर्व० २०।५२।३, २०।५७।१६)

' कण्वेभ्य सहस्रिणं वाजं धनमन्नं वा दर्षि देहीति । ' इन्द्रस्तवे कण्वपुत्रः प्रस्कण्व आह—

यं ते स्वधावन्त्स्वदयन्ति धेनव इन्द्र कण्वेषु रातयः । (ऋ० ८।४९।५)

' इन्द्र कण्वेषु रातयो दानान्यनेकविधानि ददाति वितरति । ' एवं कण्वा इन्द्रस्य प्रिया सन्तीति भाव. ।

युवं कण्वायापिरिप्ताय चक्षुः प्रत्यधत्तं सुष्टुतिं जुजुषाणा । (ऋ० १।११८।७)

' युवां सुष्टुतिं शोभना स्तुतिं जुजुषाणा सेवमानौ कण्वाय महर्षयेऽपिरिप्तायापिहितदृष्टये चक्षुरधत्तम् । ' एवमश्विनौ कण्वस्यावनं चक्रतुरित्याह कक्षीवानौशिजः ।

१३ ऋषिषु कण्वस्य स्थानम् ।

कण्वः कक्षीवान्पुरुमीढो अगस्त्यः श्यावाश्वः सोभर्यर्चनानाः ।

विश्वामित्रोऽयं जमदग्निरत्रिरवन्तु नः कश्यपो वामदेवः ॥ (अथर्व० १८।३।१५)

अथर्वा यमस्तवे नामान्येतानि ऋषीणां कथयित्वा त एते ऋषयो नोऽवन्त्विति प्रार्थयति । एतेनैतेषु ऋषिषु कण्वस्य प्रथमं स्थानमासीदिति गम्यते । तथा चैतेनैव प्रमाणेन कण्वोऽथर्वणोऽपि प्राक्कालीन एवेति सिद्ध्यति ।

१४ कण्व--होता ।

स च कण्वो होताऽऽह्वाता हवनकर्ता वा याजको वाऽऽसीदिति दृश्यते, यथा भौमोऽत्रिर्वैश्वदेवसूक्ते कथयति—

प्र सक्षणो दिव्यः कण्वहोता त्रितो दिवः सजोषा वातो अग्निः । (ऋ० ५।४१।४)

कण्वो होता यस्य, कण्वा वा होतारो यस्य, सोऽग्निरत्र स्तूयते । अग्नेराह्वातारः कण्वा इति भावः ।

१५ कण्वतमः कण्वः ।

अतिशयेन श्रेष्ठः कण्वः कण्वतमः । कण्वेषु सर्वेषु श्रेष्ठ इत्यर्थः । स किं करोतीत्याह प्रस्कण्वः काण्व उषःस्तवे—

अत्राह तत् कण्व एषां कण्वतमो नाम गृणाति नृणाम् । (ऋ० १।४८।४)

' नृणां सतां तन्नाम कण्वतमो महर्षिर्गृणाति जपति ' । सत्पुरुषाणां नाम प्रत्युषसि जपतीत्यर्थः ।

१६ पूर्वे कण्वाः ।

इन्द्राग्निस्तवे परुच्छेपो दैवोदासिः कथयति—

दध्यङ् ह मे जनुषं पूर्वो अङ्गिराः प्रियमेधः कण्वो अत्रिर्मनुर्विदुस्ते मे पूर्वे मनुर्विदुः (ऋ० १।१३९।९)

' दध्यङ्ङङ्गिरा प्रियमेधः कण्वोऽत्रिर्मनुरेते सर्वेऽपि महर्षयो मे दिवोदासपुत्रस्य परुच्छेपस्य जनुषं जन्मवृत्तं विदुः । ते सर्वेऽपि मे पूर्वे ऋषयः पूर्वकालीना महर्षयोऽतस्ते मे जन्म यथावज्जानन्ति । परुच्छेपात्पूर्वः कण्व इत्यत्र स्पष्टं भवति । कण्वात् पूर्वो नृषद इति चाग्रे प्रदर्शयिष्यामः ।

१७ कण्वस्य सूनवः ।

कण्वस्य पुत्रा अपि वर्णिता प्रशंसिताश्च दृश्यन्ते मन्त्रवर्णेषु, यथा प्रस्कण्व काण्वोऽग्निसंस्तवेऽपश्यत्—

याभिः कण्वस्य सूनवो हवन्तेऽवसे त्वा । (ऋ० १।४५।५)

' कण्वस्य सूनवः कण्वस्य पुत्राः प्रस्कण्वादयोऽग्निमवसे रक्षणाय हवन्तेऽग्निमाह्वयन्ति । ' सध्वंसः काण्वोऽप्यश्विनोः स्तवे तथैव दृष्टवान्— **पुत्रः कण्वस्य वामिह सुषाव सोम्यं मधु ॥ ४ ॥**

पुत्रः कण्वस्य वामृषिर्गीर्भिर्वत्सो अवीवृधत् ॥ ८ ॥ (ऋ० ८।८।४, ८)

' कण्वस्य पुत्रः सध्वंसोऽश्विभ्यां मधुरं सोमरसं सुषाव स ऋषिर्गीर्भिरश्विनाववीवृधत्, स्तुत्या तौ समवर्धयत् । '

१८ नार्षदः कण्वः ।

शुक्रोऽपामार्गप्रस्तावेऽपश्यत् यथा—

ब्राह्मणेन पर्युक्तासि कण्वेन नार्षदेन ।

सेनेवैषि त्विषीमती न तत्र भयमस्ति यत्र प्राप्नोष्योषधे । (अथर्व० ४।१९।२)

' नार्षदेन नृषदः पुत्रेण कण्वेन ब्राह्मणेन, हे ओषधे सहदेविनामके ! पर्युक्तासि सर्वतः प्रशंसितासि । त्वं त्विषीमती दीप्तिमती रुग्णस्य रक्षणार्थं सेनेवैषि गच्छसि । यत्र त्वं प्राप्नोषि तत्र रोगादिभयं न भवति । ' अत्र कण्वो भिषगिति दर्शितम् । स च नृषदः पुत्रः । ऋग्वेदेऽपि कण्वस्य नृषदः पुत्रत्वमुक्तं, यथाह कक्षीवानौशिजो दैर्घतमसोऽश्विस्तवे —

महः क्षोणस्याश्विना कण्वाय ।

प्रवाच्यं तद् वृषणा कृतं वां यन्नार्षदाय श्रवो अध्यधत्तम् ॥ (ऋ० १।११७।८)

' कण्वाय नार्षदाय नृषदः पुत्राय महः श्रवो महच्छ्रवणेन्द्रियमदत्तं, तद्वां प्रवाच्यं प्रशंसनीयं कृतं कर्मास्तीति ' कक्षीवानश्विनौ स्तौति । कवष ऐलूषोऽपि वैश्वदेवस्तवे कण्वं नृषदः पुत्रमेवाह यथा—

उत कण्वं नृषदः पुत्रमाहुरुत श्यावो धनमादत्त वाजी ॥ (ऋ० १०।३१।११)

' नृषदः पुत्रः कण्व इत्याहुस्तस्य गोत्रज्ञा महर्षय इति ।' अत एव युक्तमेवोक्तं नार्षदः कण्व इति । सूक्तानामृषिषु तु सर्वानुक्रमणीकारेण ' कण्वो घौर ' इत्युक्तम् । नार्षदः कण्वो, घौरश्च कण्व, सौश्रवसश्च कण्वो, (काठक सं १३।१२), बौधायनश्च कण्व (आदित्यपुराणे) एते सर्वेऽपि कण्वा, एका एवेति वा विभिन्ना इति वेति न ज्ञायते । अन्वेष्टव्योऽयं विषय इति ।

१९ पिब गाय ।

पाहि गायान्धसो मद इन्द्राय मेध्यातिथे । (ऋ० ८।३३।४)

मेध्यातिथिः काण्व इन्द्रसंस्तवे मेध्यातिथिमृषिमात्मानमेव संबोध्य ' पाहि गाय ' इति कथयति । तथा च देवातिथिः काण्व इन्द्रस्तुतौ दर्शयति—

आपित्वे नः प्रपित्वे तूयमा गहि कण्वेषु सु सचा पिब ॥ (ऋ० ८।४।३)

' हे इन्द्र ! कण्वानां यज्ञेषु सोमपानायागच्छ तत्र सोमं च पिबेति भावः । '

२० कण्वा इव ।

मेधातिथिः काण्व इन्द्रस्तवे कण्वाणामुपमा प्रयुनक्ति यथा—

कण्वा इव भृगवः सूर्या इव विश्वमिद्धीतमानशुः ।

इन्द्रं स्तोमेभिर्महयन्त आयवः प्रियमेधासो अस्वरन् । (ऋ० ८।३।१६, अथर्व० २०।१०।२; २०।५९।२)

कण्वा इव भृगव एतन्नामका ऋषयो विश्वं धीतमाध्यातमिन्द्रमानशुः प्रापुः । प्रियमेधास आयवो मानवा ऋषय इन्द्रं महयन्तः स्तोमैरस्वरन्नस्तुवन् । तथा वत्सः काण्व इन्द्रस्तवे कण्वस्योपमा प्रयुक्तवान्—

अहं प्रत्नेन मन्मना गिरः शुम्भामि कण्ववत् । येनेन्द्रः शुष्ममिद्दधे । (ऋ० ८।६।११, अथर्व० २०।११५।२)

' अहं वत्सः कण्वस्य वंशजः कण्ववत् कण्वर्षिणा सममेव प्रत्नेन पुरातनेन मन्मना मननार्हेण गिरः वाचः शुम्भामि शोभयाम्यलंकरोमि । येन इन्द्रः शुष्मं बलं दधाति । ' तथा चाथर्ववेदेऽपि कण्व-बादरायण-भागलय आहुः—

कण्वः—

अत्रिवद्वः क्रिमयो हन्मि कण्ववज्जमदग्निवत् । अगस्त्यस्य ब्रह्मणा सं पिनष्म्यहं क्रिमीन् ।

बादरायणिः— (अथर्व० २।३२।३, ५।२३।१०)

त्वया पूर्वमथर्वाणो जघ्नू रक्षांस्योषधे । त्वया जघान कश्यपस्त्वया कण्वो अगस्त्यः ॥ (अथर्व० ४।३७।१)

भागलिः—

आयुर्ददं विपश्चितं श्रुतां कण्वस्य वीरुधम् । आभारिषं विश्वभेषजीमस्यादृष्टान्नि शमयत् । (अथ० ६।५२।३)

आयुर्वेदविषयका मन्त्रा एते कण्वेन बादरायणेन भागलिना च क्रमेण दृष्टाः । कण्ववत् ब्रह्मणा मन्त्रशक्त्या रोगक्रमीन्नाशयामीति कण्वपुत्र आह । बादरायणिरपि कथयति यद्यथा पूर्वकाले कण्वोऽगस्त्यश्च त्वया चिदौषध्या रोगक्रिमीननाशयत्तथैवाहमपि रोगान् दूरीकरोमीति । भागलिरपि कथयति यद्यथा कण्वस्य वीरुधं कण्वेन रोगनिवारणाय प्रयुक्तां वीरुधं श्रुता विश्रुतां प्रसिद्धां विश्वभेषजीं सर्वरोगनिवारणसमर्थामाभारिषम् । तया च रोगबीजमशमयम् । एतेन कण्वो भैषज्यकर्मणि कुशल आसीदिति गम्यते । अग्रेऽपि कण्वानां भैषज्यं कर्म प्रदर्शयिष्याम ।

२१ कण्वोऽदुहत् ।

यामस्य कण्वो अदुहत् प्रपीनां सहस्रधारां पयसा महीं गाम् ॥ (अथर्व ७।१५।१, वा. य. १७।७४)

(काण्व य. १८।७४, काठक १८।४।९, मैत्रा. २।१०।६; कपिष्ठ० २८।४)

कण्वो ह वा एतस्य श्रायसो दोहं विदांचकार, यथा गां प्रत्तां दुह, एवमेवैतयाग्निमग्निचिद् दुहे ॥

(काठक. सं २१।२)

तामेतां कण्वा सौश्रवसा विदुः । (काठक १३।१२)

सहस्रधारां महीं गां कण्वोऽदुहत्, स एवास्या दोहनविधिं प्रथमं विदांचकार । कण्वेभ्यः पूर्वमस्मिन्विधं दोहनविधिं न कोऽप्यजानादिति दृश्यतेऽत्र ।

२२ कण्वा रोगोत्पादकाः क्रिमयः ।

यथा ऋग्वेदादिषु ऋषिवाचकः 'कण्व' इति शब्दोऽस्ति, तथैवाथर्ववेदेऽप्यस्त्येव । तथापि तत्र यत्रकुत्रचिद् रोगबीजवाचकः कण्वशब्दोऽपि दृश्यते । अस्य रोगबीजस्य संशोधनमाविष्कारो वा कण्वेनर्षिणा कृतो भवेदित्येतदर्थं तस्यर्षेः पूजार्थं कण्वेति नाम तस्मै रोगबीजाय रोगक्रमिभ्यो वा दत्तमिति तर्कयितुमत्र शक्यते । यथाद्यापि तत्त्वाविष्कारकस्यैव नाम तत्तद्विज्ञानसंभूताय तत्त्वाय दीयते, तथैवात्रापि बोद्धव्यम् । तथा हि—

गिरिमेनाँ आ वेशय कण्वान् जीवितयोपनान् ॥ ४ ॥
पराच एनान् प्र णुद कण्वान् जीवितयोपनान् ॥ ५ ॥ (अथर्व० २।२५।४-५)
उग्रा हि कण्वजम्भनी तामभक्षि सहस्वतीम् ॥ १ ॥
गर्भादं कण्वं नाशय पृश्निपर्णि सहस्व च ॥ ३ ॥ (अथर्व० २।२५।१-३)

'जीवननाशकान् कण्वान् रोगबीजान् सुदूरं प्रापय, ग्रामाद्बहिर्निःसारय । कण्वसंज्ञकः कृमिर्गर्भादो गर्भनाशको वर्तते । यो गर्भाशयं प्राप्य तत्रत्यं गर्भं नाशयति मारयति । तं पृश्निपर्णी वीरुन्नाशयति गर्भं च पुष्यतीति ।' कण्वस्यर्षेरायुर्वेदविषयक आविष्कारोऽत्र गम्यते ।

अत्रोदधृतेषु मन्त्रेषु कण्वाना प्रिया यज्ञरभा, तत्र तेषां सोमाभिषव , तेषां श्रेष्ठं यज्ञसाधनं, तैः कृतं देवतानामाह्वानम्, कण्वैः स्तोत्राणां ब्रह्मणा च करणं, तेषां गानं, देवतानामीडनं च, देवतासंबंधिन्या मते संवर्धनं, कण्वस्य भयं, तस्मात्तस्य देवताभिः कृतं परित्राणं, कण्वायानेकविधं देवैर्दत्तं दानं, महर्षिषु कण्वस्य प्रथमं स्थानं, कण्वस्य होतृत्वं, कण्वस्य श्रेष्ठत्वं, कण्वस्य पूर्वजत्वं, तस्य पुत्राः, तस्य नार्षदत्वं च दर्शितम् । कण्वे कृतं गोदोहनं चात्र प्रदर्शितम् । कण्वस्य भैषज्यनैपुण्यं, तस्य च रोगबीजभूतानां कृमीणामाविष्कारश्चात्र प्रदर्शित । एतत्सर्वं कण्वस्यर्षे वैदग्ध्यविज्ञानायालमिति कृत्वात्रैतं विषयं समापयामः ।

अत्र चत्वारः कण्वा दृश्यन्ते, तत्र कोऽयं कण्वो यस्य नाम शुक्लयजुर्वेदेन सह संबन्ध्यतेऽथवा शुक्लयजुर्वेदस्य प्रवर्तकः कश्चिदन्यः कण्वोऽस्तीत्येतद्विचार्यत इदानीम ।

कण्वस्य निवासस्थानम् ।

शुक्लयजुर्वेदस्यास्य वाजसनेयी-माध्यंदिन-संहितायां "**एष वो अमी राजा**" (वा० सं० ९।४०) इति राजविषयमधिकृत्याविशेषेणोक्तं, न तत्र स्थानविशेषनिर्देशो वा राज्यविशेषनिर्देशो वा दृश्यते । परं शुक्लयजुर्वेदस्य काण्वसंहितायां तु "**एष वः कुरवो राजा, एष वः पाञ्चालो राजा**" (काण्व सं० ११।११) इति कुरुपाचालाना नामनिर्देशपूर्वकं मन्त्रेऽस्मिन्नुल्लेखो दृश्यते, तदसंशयं सूचयति, यदेषा काण्वानां संहिता कुरूणा पाञ्चालाना च साम्राज्येन सह संबद्धेति ।

तैत्तिरीय-संहितायां चास्यैव मन्त्रस्य स्वरूपान्तरं '**एष वो भरता राजा**' इति दृश्यते, तत्तु तस्याः संहितायाः सम्राजां भरतानां संबन्धं प्रकटयति । काठक-मैत्रायणीययो संहितयोः पाठस्तु '**एष ते जनते राजा**' (काठ० १५।७, मैत्रा० २।६।९) इति, स च जानपद-शासनं तत्रत्याना मानवाना सुस्पष्टमेव सूचयति, यत्रैते द्वे संहिते प्रचलिते स्त इति ।

इत्येवमेकस्यैव मन्त्रस्य विभिन्नासु संहितासु विभिन्नो मन्त्रपाठस्तस्यास्तस्याः संहितायास्तत्तत्स्थानीयत्वं प्रदर्शयति, देशविशेषसंबन्धत्वं साम्राज्यविशेषसंबन्धत्वं वा सूचयति । तत्राप्ययं विशेषो यद्वाजसनेय-संहितायां देशवाचकं पदं न विद्यतेऽन्यासु च संहितासु देशिकं पदं विद्यते । एष एव वाजसनेय-संहिताया विशेषोऽन्याभ्यः संहिताभ्यः । यत्र तु देशिकं पदं स्यात्, तस्याः संहितायास्तेन प्रदेशेन, तेन च राज्यशासनेन संबन्धः सुतरा स्पष्टो भवति ।

यजुर्वेद-वृक्षः ।

यजुर्वेदस्य वृक्षे विविधानां यजुःशाखाना स्थानानि देशविशेषप्रचारो वा प्रदर्शित । एष च यजु शाखावृक्षो पंचवटी-नासिकक्षेत्रनिवासिनो यज्ञेश्वर-दाजीति नाम्नो वेदविदुषो मैत्रायणी-शाखावलम्बिन सकाशात् प्राप्तो पण्डितवरेण रघुवीरेण विदुषा (डाक्तरेत्युपपदधारिणा) लवपुरे मुद्रितस्तत्रैव यजुर्वेदवृक्ष एतासा संहितानां देशविशेषा एवं प्रदर्शिता —

कण्वा — कृष्णवेणाप्रदेशे,
कठाः काठकाः— गोदादक्षिणदेशे,
कण्वाः कर्णवटाः— गोमतीपश्चिमेदेशे,
मध्यंजनाः— सरयूतीरनिवासिनः,
तैत्तिरीयाः— निरंगुल-गोदादक्षिणदेशे,

मैत्रायणीयाः— गोदादक्षिणदेशे,

मैत्रायणीय-शाखाभेदाः— काश्मीरे, मरुदेशे इ० ।

तैत्तिरीय- मैत्रायणी- काठक- काण्व- वाजसनेयी- माध्यंदिनानामेतानि स्थानानि देशविशेषा वा यजुर्वेदवृक्षे दृश्यन्ते । परन्तु देशविशेषा एते नैवानुमोदन्ते मन्त्रोक्तराज्यशासनस्य स्थानानि । यथा काण्व--संहितायां कुरुपाञ्चालानां निर्देशोऽस्ति, प्रदेशावेतौ हस्तिनापुरसमीपतो वर्तेते, परं कण्वानां देशविशेषौ यजुर्वेदवृक्षे कृष्णावेणाप्रदेशस्तथा च गोमती--प्रदेशश्चोक्तौ । एतौ देशौ कुरुपाञ्चालानां नैवाधिराज्य आसन् । एतयोर्देशयोरुपरि कुरुपाञ्चालानां राज्यं न कदाचिदप्यासीत् । यत एतद्विषये न किमपि प्रमाणं दृश्यते । तथैव तैत्तिरीयाणां संहितायां भरतो राजेत्युक्तम्, भरतानां साम्राज्यं हस्तिनापुर एवासीत्, परंतु तैत्तिरीयाणां गोदादक्षिणदेश इति वेदवृक्ष उक्तम् । एवं वेदवृक्षेण यत्कथितं तत्संहितावचनेन नैव संगच्छते । वेदवृक्षकथनान्मन्त्रोक्तं कथनं बलवत्तरमस्तीति निश्चयः । अतो भरतानां कुरूणां पाञ्चालानां च प्रदेशा उत्तरीया एव ग्राह्या इत्यस्माकं मतिः । तत्र चोत्तरीयाणां कुरुपाञ्चालानां भरतानां च साम्राज्येन सह काण्वसंहितायास्तैत्तिरीय--संहितायाश्च क्रमेण सम्बन्धः संहितोक्तप्रमाणबलेन दृश्यते, न स वेदवृक्षोक्तेन तिरस्कर्तुं शक्यः । वेदवृक्षस्य च प्रामाण्यं चिन्त्यमेव, तत्तु संहितावचनप्रामाण्याद्धीनतरमेवास्तीति प्रतिभाति ।

वेदवृक्षोक्तशाखास्थानानि तु उत्तरकालिकानि भवेयुः संहितोक्तस्थानानि पूर्वकालीनानि इत्येवं द्वयोरपि स्थानयोश्चारितार्थ्यं स्यादेव ।

कोऽयं कण्वः ?

अत्रेदानीं कोऽयं कण्व इति विचारणीयम । किं ऋग्वेदमन्त्रोक्तोऽयं कण्वो घोरो येनैषा काण्वसंहिता प्रवर्तिता ? नेति ब्रूमः । कुत इति चेत्कथ्यते ।

बौधायनपितृत्वाच्च प्रशिष्यत्वाद् बृहस्पतेः ।
शिष्यत्वाद्याज्ञवल्क्यस्य कण्वोऽभून्महतो महान् । (आदित्यपुराणे)

अयं कण्वो याज्ञवल्क्यस्य शिष्यः, शुक्लयजुर्वेदाचार्यस्यादित्यस्य प्रशिष्यो, बौधायनस्य पुत्रः । याज्ञवल्क्योऽस्य गुरुः, स तु विदग्धस्य शाकल्यस्य समीपे शिष्यरूपेण स्थित्वा तस्याश्रमे वेदाध्ययनार्थमुषित्वा, ऋग्वेदमधीतवान् त्यक्तवांश्च । अत एतत्सिद्ध्यति यदस्य कण्वस्य गुरोर्याज्ञवल्क्यात् पूर्वमेव ऋग्वेदस्यास्यैषा संहिता आसीदिति, या तु शाकलप्रवर्तितत्त्वाच्छाकलसंहितेतीदानीं प्रसिद्धा। अत ऋग्वेदमन्त्रोक्तः कण्वो घोर एतस्याः काण्वसंहिताया प्रवर्तको भवितुमशक्यः ।

कण्वो नार्षदस्तु यदि घोरादन्यो भवेत्तर्हि स तस्मात्कण्वादपि प्राचीनतरो दृश्यते । अतः स एतस्याः काण्वसंहितायाः प्रवर्तको नैव भवितुं शक्यते ।

अतः कोऽपि तृतीय एव कण्वोऽभवेद्यः स्वल्वेतं शुक्लयजुर्वेदं प्रावर्तयत । स च बौधायनस्य पुत्रो याज्ञवल्क्यशिष्य कण्वो योऽस्याः संहितायाः प्रवर्तको दृश्यते । अतः कण्वो बौधायन इत्यस्य प्रसिद्धिः ।

शुक्लयजुषामाचार्य आदित्यः । तस्माद्याज्ञवल्क्येनायातयामानि यजूंष्यधीतानि । एव कण्वस्तु तस्माद्याज्ञवल्क्यादेव यजुर्वेदं शुक्लमधीतवान । ततो याज्ञवल्क्यसमकालीन एवैष कण्वो दृश्यते । याज्ञवल्क्यस्य काले निश्चिते सत्यस्य कालोऽपि ज्ञातुं शक्यते । अतो याज्ञवल्क्यस्य कालविषयमत्रेदानीं विचारयाम ।

याज्ञवल्क्यस्य कालः ।

सैषा शुक्लयजुर्वेदस्य संहिता वाजसनेयी, माध्यंदिनीया वा संहितेति कथ्यते । वाजसनेयोऽयमेव याज्ञवल्क्यः । वाजसनिस्तस्य पिता, तस्य पुत्रोऽयं वाजसनेयः, तेन प्राप्ता संहिता वाजसनेयी ।

तस्यास्य वाजसनेयस्य याज्ञवल्क्यस्याश्रमो वृद्धनगरे (भाषाया वडनगर इति ख्याते) अर्बुदपर्वतस्य (भाषायामाबूपहाड इति ख्यातस्य) ऐशान्या दिशि (श्रीमता गायकवाडमहाराजानां राज्ये महसाणाप्रान्ते अहमदाबादनगरस्योत्तरस्यां दिशि) प्रख्यातोऽभूदिति प्रसिद्धिः पुराणेषु दृश्यते । यथा—

तथान्योऽपि च तत्रास्ति याज्ञवल्क्यसमुद्भवः।
आश्रमो लोकविख्यातो मूर्खाणामपि सिद्धिदः॥ (स्कन्दपुराणे नागरखण्डे अ० १२९)

अस्यैव वृद्धनगरस्य नामान्तराणि चमत्कारपुरं, आनन्दपुरं, आनर्तपुरं, वर्धमानपुरमित्यादीनि बहूनि पुराणान्तरेषु सन्ति। अस्मिन्नेव नगरे याज्ञवल्क्यः सहशिष्य उवास। महात्मनोऽस्य याज्ञवल्क्यस्य ज्ञानविज्ञानाभ्यां समाकृष्टेन जनकेन समाहूतोऽयं मिथिलां गत्वा, तस्मै राज्ञे ब्रह्मज्ञानमुपादिश्य, तत्रैव न्यवसत। तथा हि—

ब्राह्मणैर्याज्ञवल्क्यस्तु विज्ञातो येन केन तु। विदेहेन ततः प्राप्तः श्रवणार्थं नराधिपः।
वेदान्तानां च सर्वेषां रत्नाख्येन महीभुजा॥ (स्कं० पु० नागरखंडे)

स्कंदपुराणस्य नागरखण्डस्यैकोनत्रिंशतितमेऽध्याये याज्ञवल्क्यस्य महामुनेः संक्षिप्तं चरितं विद्यते। तत्र याज्ञवल्क्यस्यार्वेदाध्यापको विदग्धः शाकल्य आसीदिति कथितम्। सोऽपि विदग्धः शाकल्योऽत्रैव वर्धमानपुर(वडनगरे)ऽवसदिति पुराणेषु दृश्यते। एष एव विदग्धः शाकल्यो जनकसभायां परास्तो याज्ञवल्क्येनेति बृहदारण्यकस्य तृतीयेऽध्याये (बृ० उ० ३।९।२६, शतपथे ब्राह्मणे वा चतुर्दशे काण्डे १४।७।२८) कथितम्।

शतपथस्य ब्राह्मणस्य रचनाकालः।

शतपथाख्यं ब्राह्मणं भगवता याज्ञवल्क्येन रचितमिति महाभारते लिखितं यथा—

प्रतिष्ठास्यति ते वेदः सखिलः सोत्तरो द्विज। कृत्स्नं शतपथं चैव प्रणेष्यसि द्विजर्षभ॥११॥
ततः शतपथं कृत्स्नं सरहस्यं ससंग्रहम्। चक्रे सपरिशेषं च हर्षेण परमेण ह॥१६॥
कृत्वा चाध्ययनं तेषां शिष्याणां शतमुत्तमम्॥१७॥
सूर्यस्य चानुभावेन प्रवृत्तोऽहं नराधिप। कर्तुं शतपथं चेदमपूर्वं च कृतं मया।
यथाभिलषितं मार्गं तथा तच्चोपपादितम्॥२३॥ (म० भा० मोक्ष० अ० १४४)

स्वयं याज्ञवल्क्य एवैतत्कथयति, यदहं भगवत आदित्यस्यादेशात्सरहस्यं कृत्स्नं शतपथं कृतवानिति। अतो यस्तु शतपथस्य ब्राह्मणस्य कालः स एव याज्ञवल्क्यस्य कालो भवति। तथा च स एव कण्वस्यापि कालस्तस्य याज्ञवल्क्यशिष्यत्वात्। तथा च—

एतेन हैन्द्रोतो दैवापः शौनको जनमेजयं पारिक्षितं याजयाञ्चकार ... तदेतद्गाथयाभिगीतं
आसन्दीवति धान्यादं रुक्मिणं हरितस्रजम्। अबध्नादश्वं सारंगं देवेभ्यो जनमेजयः।(श० ब्रा० १३।५।४।१-२)
एतेन ह वा ऐन्द्रेण महाभिषेकेण तुरः कावषेयो जनमेजयं पारिक्षितमभिषिषेच।
तदेषा यज्ञगाथाभिगीयते.. आसन्दीति० (ऐ० ब्रा० ८।२१)

भीष्म उवाच— अत्र ते वर्तयिष्यामि पुराणमृषिसंस्तुतम्। इन्द्रोतः शौनको विप्रो यदाह जनमेजयम्।
आसीद्राजा महावीर्यः पारिक्षिज्जनमेजयः। एवमुक्त्वा तु राजानमिन्द्रोतो जनमेजयम्।
याजयामास विधिवद्वाजिमेधेन शौनकः। (महाभारत, अ० १४९)

एष पारिक्षिज्जनमेजयः पितामहाद्भीष्मादपि प्राचीनतमोऽत एव शौनकस्तं याजयामासेति परोक्षभूतप्रयोगोऽत्र भीष्मेण प्रयुक्तः। यस्तु युधिष्ठिरस्य प्रपौत्रो जनमेजयः पारिक्षितः स त्वन्य एवैतस्मात्।

द्वौ जनमेजयावास्ताम्। एको युधिष्ठिरस्य महाराजस्य प्रपौत्रो, द्वितीयस्तु युधिष्ठिरात्प्राचीनो द्विचत्वारिंशत्तम पूर्वज इति। अस्यैवेतिहासं भीष्म आह, तं शौनको याजयामासेति। स एवेतिहासः शतपथे ऐतरेये च ब्राह्मणे दृश्यते। शतपथं ब्राह्मणं तु याज्ञवल्क्येनादित्यस्याचार्यस्याज्ञया रचितम्। अतो यः शतपथस्य काल स एव याज्ञवल्क्यस्य कालो भवितुं शक्यः।

कृत्तिकास्वादधीत। एता ह वै कृत्तिकाः प्राच्यै दिशो न च्यवन्ते सर्वाणि ह वान्यानि
नक्षत्राणि प्राच्यै दिशश्च्यवन्ते॥ (श० ब्रा० २।१।२।१-२)

अत्र कृत्तिकानां पूर्वस्यां दिशि च्यवनरहितमवस्थानं केनापि ऋषिणा दृष्टं, तदेव शतपथे तेन वर्णितम्। अत एव 'न च्यवन्ते'

इति वर्तमानकालीनः प्रयोगोऽत्र संगच्छते । इदानीं तु प्राचीं दिशं त्यक्त्वान्यत्रोर्ध्वं गताः कृत्तिकाः । तेषां तदुपर्ययनं पञ्चसहस्रैर्वर्षैरेव भवितुं शक्यते । अतः कृत्तिकानां प्राचीदिगवस्थानं शकपूर्व (संवत्पूर्वं वा) त्रिसहस्रवर्षेभ्यः प्राक्कालीनमासीदिति निश्चीयते खगोलविद्भिः । एतच्छ्रीमद्भिः शंकर–बालकृष्ण–दीक्षितैः स्वीये भारतीय--ज्योतिषशास्त्रे प्रमाणैरनेकविधैः परिष्कृतम् ।

यस्तु शतपथस्य कालः स एव भगवतो याज्ञवल्क्यस्य कालः, स एव विदग्धस्य शाकल्यस्य कण्वस्य बौधायनस्य चेति दर्शितं पूर्वमेव । अत एवोच्यते याज्ञवल्क्यस्य जनकस्य च समय इतः पूर्वं पञ्चसहस्रवर्षीय , तस्य च ऋग्वेदाध्यापको विदग्धः शाकल्यो यो माण्डूकेयस्य पुत्रो, येन च ऋग्वेदस्य पदपाठः कृतः । तमेतं शाकल्यं याज्ञवल्क्यः परास्तवान जनकसभायाम् (बृ० उ० ३।९।२६)। याज्ञवल्क्यस्य च शिष्यः कण्वः । अत सोऽपि एतत्कालीन एवेति सिद्धम् ।

श्रीमद्भागवतस्य नवमस्कन्धे विश्वामित्रस्य पूर्वे पुरुषा दर्शिता । त एते— १ नारायणः, २ ब्रह्मा, ३ अत्रिः, ४ सोमः, ५ बुधः, ६ पुरूरवा, ७ विजयः, ८ भीमः, ९ काञ्चन , १० होत्रकः, ११ जह्नुः, १२ पुरु , १३ बलाकः, १४ अजाक , १५ कुश (इषीरथः), १६ कुशाम्बुः (कुशिकः), १७ गाधी, १८ विश्वामित्रः ।

एष विश्वामित्रो मण्डलं तृतीयमृग्वेदस्यापश्यत । एतदाह सर्वानुक्रमणीकारः कात्यायनो यथा—

'**गाधिजो विश्वामित्रः स तृतीयं मण्डलमपश्यत्** इति'। अस्यैव विश्वामित्रस्य कृत्रिमः पुत्रः शुनःशेपो देवरातः, स तु हरिश्चन्द्रस्य नरमेधगाथाया प्रसिद्धः (ऐ० ब्रा० ७।१३)। स एष शुनःशेपः ऋग्वेदस्य प्रथममण्डलस्थानि कतिपयानि सूक्तान्यपश्यत। अस्यैव शुनःशेपस्य पुत्रः कतिः, तस्य पुत्रः शुनःपुत्र इति, तस्य च पुत्रश्चारायणो यो देवरात इति वा प्रसिद्धः । एष चारायणो यजुर्वेदस्य चरकान्तर्गतायाश्चारायणीय–शाखायाः प्रवर्तकः । एष चारायणिर्देवरातो, ब्रह्मरातो, यज्ञवल्क्यो, वाजसनिरित्याद्यनेकैर्नामभिः प्रसिद्धः। अस्यैव पुत्रो याज्ञवल्क्यो वाजसनेयो दैवरातिरिति। अत एवाहुश्चतुर्वेदभाष्यकाराः सायणाचार्या काण्वसंहिताभाष्योपक्रमे—

वाज इत्यन्नस्य नामधेयं, अन्नं वै वाज इति श्रुतेः। वाजस्य सनिर्दानं यस्य महर्षेरस्ति सोऽयं वाजसनिस्तस्य पुत्रो वाजसनेय इति तस्य याज्ञवल्क्यस्य नामधेयम् ।

बृहदारण्यकोपनिषद्भाष्ये शंकराचार्यपूज्यपादाः कथयन्ति— '**एवमाह स्मोक्त्वा किल याज्ञवल्क्यो यज्ञस्य वल्को वक्ता यज्ञवल्कः, तस्यापत्यं पुमान्याज्ञवल्क्यो दैवरातिरित्यर्थः ।**' तथा च—

यज्ञानां यज्ञकाण्डानां वेदानां वल्को वक्ता वचनशीलो यज्ञवल्कः । ब्रह्मरातो महाकर्मठः । तस्य गोत्रापत्यं पुमान्याज्ञवल्क्यः । (कृष्णसूरिकृते वेदनिरूपणे)

एवं विश्वामित्रस्य कृत्रिमः पुत्रः शुनःशेपः, तस्य प्रपौत्रो यज्ञवल्कश्चारायणीयशाखाप्रवर्तक । तस्य पुत्रो याज्ञवल्क्यः स चायातयामानि शुक्लानि यजूंषि सूर्यादाचार्यात्प्राप्य, वाजसनेयी--माध्यंदिनीय–शाखायाः प्रवर्तकोऽभूत । तस्य याज्ञवल्क्यस्य पुत्रः कात्यायनी--संजातः कात्यायनः परासां शाखानां ग्रन्थनिर्माणकरणात्पारस्कर इति नाम्ना प्रसिद्धः । स एव वररुचेः पिता ।

एष याज्ञवल्क्यो वर्धमाननगरे चमत्कारपुरे पूर्वोक्ते सहस्रशिष्यं विदग्धं शाकल्यमृग्वेदाचार्यमृग्वेदाध्ययनार्थमुपेयिवान । एष एवाचार्य ऋग्वेदस्य शाकलशाखाया प्रवर्तकः । अनेन शाकल्येनाज्ञप्तो याज्ञवल्क्यो राजानं चमत्कारपुरस्य याजयामास । तेन राज्ञा केनापि निमित्तेनापमानित उपहसितश्च याज्ञवल्क्यो राजानं तं, पुनः पुनश्चोद्यमानोऽप्याचार्येण नैव पुनर्जगाम, न च तं पुनर्याजयामास । तेन क्रुद्धः शाकल्यो याज्ञवल्क्यं स्वकीयाज्ञाभङ्गकारिणमिति मत्त्वाधिचिक्षेप । तेन याज्ञवल्क्यः शाकल्यं त्यक्त्वा, प्रभासक्षेत्रं संप्राप्य, स्वकीयमेव मातामहं यजुर्वेदाचार्यं वैशंपायनं यजुषामध्ययनार्थं जगाम । तत्र वसता याज्ञवल्क्येन सह वैशंपायनस्यापि तथैव केनापि निमित्तेन कलहोऽभूत्, येन तमप्याचार्यं याज्ञवल्क्यस्तत्याज (श्री० भागवते १२।६, ब्रह्माण्डपुराणे पू० अ० ५, विष्णुपुराणे ३।५, आत्मपुराणे १०)

एवं त्यक्ताचार्यद्वयस्त्यक्तवेदद्वयश्च याज्ञवल्क्य आचार्यमादित्यं गत्वा तमुपास्य तस्मादयातयामानि यजूंषि प्राप्तवान ।

आदित्यानीमानि शुक्लानि यजूंषि वाजसनेयेन याज्ञवल्क्येनाख्यायन्ते । (श० ब्रा० १४।९।५।३३)

उद्दालकस्य शिष्यो याज्ञवल्क्यः । (श० ब्रा० १४।९।४।३३)

अयातयामानि तु भानुगुप्तान्यन्यानि जातानि तु नीरसानि ।

यजूंषि तेषामथ याज्ञवल्क्यो ह्ययातयामानि रवेरवाप ॥ (देवी भा० ९।५)

इत्युक्तो भगवान् सूर्यो याज्ञवल्क्यं महामुनिम् ।
वेदान् षडङ्गसहितान् रहस्यादिसमन्वितान् ।
चतुरोऽध्यापयामास स्थापयित्वा रथे निजे ॥
प्राप्य वेदान् मुनिः सर्वान् गृहस्थाश्रमधर्मवान् ।
चतुर्वेदार्थिनः शिष्यानुपनिन्ये महामनाः ।
चतुर्धा दृश्यते तस्य मुनेः शिष्यौघमण्डली ।
अध्यापनरतस्यैषा याज्ञवल्क्यस्य धीमतः ॥ (आत्मपुराणे ७।३८-४५)

भगवत्पूज्यपादाः शंकराचार्या अपि याज्ञवल्क्यं चतुर्वेदमेवाहुः (बृ० उ० शांकरभाष्ये ३।१।२) ।

स तथेति प्रतिज्ञाय प्रविश्यादित्यवाजिनः ।
कर्णेऽपठत्ततो वेदांश्चतुरोऽपि च तन्मुखात् ।
(स्कं० पु० ना० खं० २७८)

एवमेव याज्ञवल्क्यो ब्रह्मसंप्रदायं त्यक्त्वादित्यसंप्रदायं स्वीकृतवान्। वेदानां द्वौ संप्रदायौ, ब्रह्मसंप्रदाय आदित्यसंप्रदायश्च। तथा हि-

ब्रह्मणः संप्रदायोऽयं व्याससंदर्शितोऽभवत् ।
विभक्तस्यैव वेदस्य संप्रदायो द्विधा मतः ।
ब्रह्मणः संप्रदायस्तु आदित्यस्य तथा मतः ।
अयातयामसंज्ञोऽयं कृत्स्नकर्मप्रकाशकः ॥ (जाबालसंहितायां अ० १)

ब्रह्म-संप्रदायः	आदित्य-संप्रदायः
[ऋग्वेदस्य]	[ऋग्वेदस्य]
आश्वलायनाद्याः २० शाखाः	शांख्यायनी (बाष्कला कौषीतकी वा)
[यजुर्वेदस्य]	[यजुर्वेदस्य]
कृष्ण-यजुर्वेदस्य ८६ शाखाः	काण्व-माध्यंदिनाद्या. १५ शाखा·
[सामवेदस्य]	[सामवेदस्य]
जैमिनी-राणायणीयाद्याः शाखाः	कौथुमी शाखा
[अथर्ववेदस्य]	[अथर्ववेदस्य]
पिप्पलादी शाखा	शौनकीया शाखा

ब्रह्म-संप्रदाये एवमृषिपरंपरा दृश्यते- ब्रह्मा- वसिष्ठः- शक्तिः- पराशरः- व्यास । एतस्माद् व्यासात्पैल ऋग्वेदस्य, वैशंपायनो यजुर्वेदस्य, जैमिनि· सामवेदस्य, सुमन्तुरथर्ववेदस्य प्रवर्तकोऽभूदिति ।

आदित्यसंप्रदाये तु आदित्याद्याज्ञवल्क्यस्तस्मात् शांख्यायन ऋग्वेदस्य, कण्वमाध्यंदिनौ यजुर्वेदस्य, सामश्रवा कौथुमश्च सामवेदस्य, शौनकोऽथर्ववेदस्य प्रवर्तकोऽभूदिति ।

एवं सनातनावेतौ द्वौ संप्रदायौ वेदस्यैकस्यैवैतौ द्वौ प्रवाहाविव दृश्येते ।

कण्वो याज्ञवल्क्यशिष्यः ।

कृष्णयजुर्वेदान्तर्गत-बौधायनशाखा-प्रवर्तको बौधायन , तस्य पुत्रोऽयं कण्वो याज्ञवल्क्यादादित्यादागतानि शुक्लानि यजूंष्यधीतवान् । तेनायं काण्वो बौधायनो याज्ञवल्क्यस्य शिष्यो भगवत आदित्यस्य प्रशिष्योऽस्याः संहितायाः प्रवर्तकः । यद्यप्येषो याज्ञवल्क्यशिष्यस्तथापि स यजुर्वेद-पठने गुरुं नानुगतवान् । तेन माध्यंदिन-संहितायाः काण्व-संहितायाश्च पठने महान्भेदो दृश्यते । काण्वा मन्त्रानृग्वेदवत्पठन्ति, माध्यन्दिनाश्च स्वकीयां परिपाटीमनुसरन्ति । पुरुषेति काण्वाः, पुरुखेति माध्यंदिनाः पठन्ति । एवमेवान्योऽपि महान्भेदो पठन-परिपाट्या दृश्यते ।

आदित्यसंप्रदायान्तर्गतान्येतानि शुक्लानि यजूंषि सन्तीति सर्वैः श्रूयते । तान्येतानि काण्वपरिपाटीवदुक्तानि वा वाजसनेयीपरिपाटीवदुक्तान्यादित्येनेति नेदानीं ज्ञातुं शक्यते । यदि कण्वो याज्ञवल्क्यादध्येतवांस्तर्हि केन कारणेन मन्त्रोच्चारणे तं नानुसृतवानित्यपि नैव ज्ञायते । याज्ञवल्क्य-संहितायाः काण्वसंहितायाश्च पाठभेदो वर्णोच्चारणभेदश्च निमित्तेन केन संभूत इत्येष चिकित्सनीयोऽयं विषयः ।

संवतः पूर्वं त्रिसहस्रवर्षमिते समये कण्वो याज्ञवल्क्यादेतानि यजूंषि प्राप्तवान् । नैतेन शुक्लयजुषामेष एव कालो भवितुं शक्यः । तेषां याज्ञवल्क्यादपि पूर्वमाचार्यैस्थादित्यस्य संनिधौ सुगुप्तत्वात् । अत एव शुक्लयजुषां समयोऽज्ञात एव, न ज्ञायते केनापि तानि कदा गुप्तानि तत्रादित्यस्य सकाशे इति । परं वाजसनेयी-संहितायाः प्राप्तिकालः काण्व-संहितायाश्च संग्रह-काल उक्तपूर्व इत्येवात्र साधितमस्माभिः ।

कर्मकाण्ड-ज्ञानकाण्ड-विषयः ।

अस्यां संहितायामध्यायाश्चत्वारिंशत् । एकोनचत्वारिंशदध्यायावधि कर्मकाण्डमनेकविधं, तदूर्ध्वं चत्वारिंशत्तमेऽध्याये ब्रह्मविद्या चेति सांप्रदायिकाः कथयन्ति । चत्वारिंशदध्यायान्तर्गताना मन्त्राणा मननेन नैतन्मतं सांप्रदायिकानां परिपुष्यति । तद्यथा- **सहस्रशीर्षेति** पुरुषमेधसंज्ञकः (वा० सं० अ० ३१; का० सं० अ० ३५), **तदेवाग्निस्तदादित्येति** सर्वमेधसंज्ञक (वा० सं० अ० ३२, काण्व० ३५), **ऋचं वाचमिति** शान्तिकरणं (वा० सं० ३६, काण्व. ३६) एवमनेका अध्याया अध्यात्मविद्याप्रकाशका दृश्यन्ते । तेषां मन्त्राणां कर्मणि प्रयुक्तत्वात्तेषां ब्रह्मविद्याप्रकाशकत्वं नैव विलोप्तुं शक्यते । **सर्वे वेदा यत्पदमामनन्तीति** श्रुतेः (कठ उ. १।२।१५) सर्वेषा वेदाना तत्पदप्रकाशकत्वेन केवलं कर्मण्यप्रयुक्ता मन्त्रा एवाध्यात्मविद्याप्रकाशका इति मन्तुं नैव शक्यते । अस्मन्मते तु कर्मणि प्रयुक्ता अपि बहवः सन्ति मन्त्राः, येषु ब्रह्मविद्या स्फुटतरं प्रकटीभूताऽनुभूयते। अत एव **'यस्तन्न वेद किमृचा करिष्यति, य इत्तद्विदुस्त इमे समासते।** (ऋ. १।१६४।३९) इति युक्तमेवोक्तमाम्नायेन । अतो ब्रह्मण प्रतिपादनं वेदमन्त्रेष्ववश्यमेव तिलेषु तैलवत् साधकैर्द्रष्टव्यं, ये तु तत्र तन्नानुभवितुं शक्नुवन्ति, तेषा वेदमन्त्रैः किमपि प्रयोजनं नैव सेत्स्यतीति स्वयं वेद एव कथयति ।

ईशावास्योपनिषद् ।

सर्वासूपनिषत्सु मन्त्रोपनिषदीशावास्येति प्रसिद्धा । सा काण्वसंहितान्तर्गता शंकराचार्यप्रभृतिभिः सर्वैराचार्यैः स्वीकृता । तथैवेशापनिषद्भाष्यभूता बृहदारण्यकोपनिषदिति या प्रसिद्धा सापि काण्वानामेवानुमोदिता एतैराचार्यैः ।

तथापि नैवैतेन वाजसनेयिसंहितोक्तेशोपनिषत्परित्यक्ता तैरिति मन्तुं शक्यते । तिरस्कृतत्वविषये प्रमाणाभावात् ।

भर्तृप्रपञ्चाख्यवृत्तिकारैस्तु शंकराचार्येभ्यः प्राचीनैर्माध्यंदिनीयेशोपनिषत् तेषामेव बृहदारण्यकोपनिषच्च व्याख्याता, अतस्ते द्वेऽपि प्रामाणिक एव ।

आदर्शग्रन्थाः ।

तत्र मुद्रितग्रन्थाः-

(१) निर्णयसागराख्ये यंत्रालये मुंबय्यां मुद्रिता उवटमहीधरभाष्यद्वयसमेता वाजसनेयि-संहिता,

(२) वाजसनेयि शुक्लयजुर्वेद-संहिता माध्यंदिनीयशाखापाठभेदसमेता मिश्रभाष्ययुता मुंबय्या श्रीवेंकटेश्वरमुद्रणालये मुद्रिता,

(३) शुक्लयजुर्वेदसंहिता पत्रात्मका मुंबय्या मुद्रिता,

(४) शुक्लयजुर्वेदसंहिता अजमेर-वैदिकयंत्रालये मुद्रिता,

(५) शुक्लयजुर्वेदीय-काण्वसंहिता मद्रासनगरेमुद्रिता,

(६) शुक्लयजुर्वेदसंहिता उवटमहीधरभाष्यद्वयसमेता स्थूलाक्षरा काश्यां मुद्रिता,

(७) काण्वसंहिता सायणभाष्यसहिता काश्या चौखाम्बा-यंत्रालये मुद्रिता,

(८) शुक्लयजुर्वेद-संहिता पण्डित-दुर्गादास-लाहिरी-शर्मणा-संपादितानेकभाषानुवादसहिता (प्रथमो भागः) कलिकात्तामुद्रिता,

(९) सैव वंगीयभाषानुवादसहिता कलिकात्तामुद्रिता,

(१०) सैव भाष्यद्वयसमेता शार्मण्य-देशमुद्रिता काण्वपाठसंहिता ।
(११) काण्वयजुःसंहिता धारवाडनगरे मुद्रिता पत्रात्मका ।

लिखितग्रन्थाः ।

१ नासिक-पञ्चवटी-क्षेत्रात्प्राप्ता काण्वयजुःसंहिता वैदिकानां अध्ययनपरंपरया शोधितातीवशुद्धा पत्रात्मका । एषा संहित पण्डितवर्य-श्रीधर-अण्णाशास्त्री-वारे इत्येतेषां महत्या कृपया श्रीमद्भ्यो वेदमूर्तिभ्यो घनपाठिभ्य काण्वशाखीयेभ्यो नीलकण्ठवामन-डिंगरे-जोशीनामकेभ्यो नासिकक्षेत्रवास्तव्येभ्यः प्राप्ता, संपूर्णा ।

२ सैव तथैव पदपाठयुता ।

३ धारवाडनगरात्प्राप्ता काण्वयजुःसंहिता ।

४ महिशूरनगरात्प्राप्ता काण्वयजुःसंहिता ।

सर्वाण्येतानि लिखितपुस्तकानि शुद्धान्यासन्नतस्तेषां वैदिक-पाठनिश्चयकरणे महत्साहाय्यं प्राप्तमिति ।

पाठविशेषाः ।

उत्तरीयेषु महाराष्ट्रीय-काण्वसंहिता-लिखित-ग्रन्थेषु तथा च दाक्षिणात्येषु ग्रन्थेषु यत्र कुत्रापि लेखनभेदो पाठभेदश्च दृश्यते यथा-

(उत्तरीयेषु)	(दाक्षिणात्येषु)
जागतेन छन्दसा	जागतेन च्छन्दसा
अछिद्रेण	अच्छिद्रेण
त्वा छन्दसा	त्वा च्छन्दसा

एवं दाक्षिणात्येषु सर्वत्र चकाराधिक्यमुत्तरीयेषु च ग्रन्थेषु चकारराहित्यं दृश्यते । अत्रास्माभिरुत्तरीयः पाठः स्वीकृतः । दाक्षिणात्योऽपि नैव दुष्ट इत्यस्माकं मतिः । सोऽपि व्याकरणशुद्ध एव ।

ईदृग्विधान्पाठांस्त्यक्त्वा न केऽपि पाठभेदा दाक्षिणात्येषूत्तरीयेषु च ग्रन्थेषु दृश्यन्ते ।

संशोधकाः ।

अस्याः काण्वसंहितायाः पाठनिश्चये परिशोधने च येषां महत्सहाय्यमभूत्त इदानीं पूजनीयाः—

१ श्रुतिपारंगताः काव्यतीर्था मीमांसका विद्याभरणभूषिताः श्रौतस्मार्तकोविदाः श्रीधर-अण्णाशास्त्री-वारे – शतपथब्राह्मणस्य संपादकाः नासिकनिवासिनः । एतैरनेकविधं सहाय्यं लिखितग्रन्थप्राप्तिमारभ्य मुद्रणस्यान्तपर्यन्तं कृतमतस्ते प्रथममत्र सुपूजनीया ।

२ श्रीमन्तो वेदमूर्तयो घनपाठिनश्चिदंबरशर्माणो याज्ञवल्क्याश्रमनिवासिनो बंगलोरकृतवास्तव्याः काण्वयजुर्वेदाचार्याः महिशूरस्था आस्थानविद्वांस ।

एतैर्यजुर्वेदाचार्यैर्यजुर्वेदस्यास्य शुक्लस्य काण्वशाखायाः संहितायाः संशोधनकर्मणि पाठनिर्णयकर्मणि चातीव साहाय्यं कृतमतस्ते सर्वेऽपि प्रशंसामर्हन्ति ।

शुक्लयजुषा माध्यंदिनीया संहिता तु पूर्वमेवास्माभिः प्रकाशिता । इदानीं काण्वानामेषा संहितेश्वरकृपया मुद्राप्य वेदाध्यायिनां-वैदिकधर्मिणां पुरस्तात् प्रकाश्यते, सैषा वैदिकधर्मश्रद्धालूनां प्राप्स्यत्यादरस्य स्थानमित्याशास्ते ।

औंधराजधान्यां विजयादशम्याम्
शाकीय १८६२ आश्विन शु० १०
} **भट्टाचार्यः श्रीपादशर्मा दामोदरसूनुः सातवळेकरकुलजः**

शुक्ल--यजुर्वेदीय-

काण्व-संहिताध्यायानां सूची ।

अध्यायः	पृष्ठानि
प्रथमो दशकः ।	
१ प्रथमोऽध्यायः	१–४
२ द्वितीयोऽध्यायः	४–८
३ तृतीयोऽध्यायः	८–१२
४ चतुर्थोऽध्यायः	१२–१५
५ पञ्चमोऽध्यायः	१५–१९
६ षष्ठोऽध्यायः	१९–२३
७ सप्तमोऽध्यायः	२३–२६
८ अष्टमोऽध्यायः	२७–३०
९ नवमोऽध्यायः	३०–३३
१० दशमोऽध्यायः	३३–३६
द्वितीयो दशकः ।	
११ एकादशोऽध्यायः	३७–४१
१२ द्वादशोऽध्यायः	४१–४७
१३ त्रयोदशोऽध्यायः	४७–५३
१४ चतुर्दशोऽध्यायः	५४–५८
१५ पञ्चदशोऽध्यायः	५८–६२
१६ षोडशोऽध्यायः	६३–६८
१७ सप्तदशोऽध्यायः	६८–७३
१८ अष्टादशोऽध्यायः	७३–७९
१९ एकोनविंशोऽध्यायः	७९–८३
२० विंशोऽध्यायः	८३–८६

अध्यायः	पृष्ठानि
तृतीयो दशकः ।	
२१ एकविंशोऽध्यायः	८७–९४
२२ द्वाविंशोऽध्यायः	९५–९९
२३ त्रयोविंशोऽध्यय	९९–१०५
२४ चतुर्विंशोऽध्यायः	१०५–१०९
२५ पञ्चविंशोऽध्यायः	१०९–११४
२६ षड्विंशोऽध्यायः	११५–११८
२७ सप्तविंशोऽध्यायः	११८–१२२
२८ अष्टाविंशोऽध्यायः	१२२–१२३
२९ एकोनत्रिंशोऽध्यायः	१२४–१२७
३० त्रिंशोऽध्यायः	१२७–१३०
चतुर्थो दशकः ।	
३१ एकत्रिंशोऽध्यायः	१३१–१३४
३२ द्वात्रिंशोऽध्यायः	१३५–१४०
३३ त्रयस्त्रिंशोऽध्यायः	१४०–१४३
३४ चतुस्त्रिंशोऽध्यायः	१४३–१४५
३५ पञ्चत्रिंशोऽध्यायः	१४६–१४९
३६ षट्त्रिंशोऽध्यायः	१५०–१५१
३७ सप्तत्रिंशोऽध्यायः	१५१–१५३
३८ अष्टत्रिंशोऽध्यायः	१५३–१५५
३९ एकोनचत्वारिंशोऽध्याय.	१५५–१५६
४० चत्वारिंशोऽध्यायः	१५७–१५८

अथ शुक्लयजुर्वेदीय-

काण्व-संहिता ।

अथ प्रथमो दशकः ।

अथ प्रथमोऽध्यायः ।

॥ ओ३म् ॥ इषे त्वोर्जे त्वा वायवं स्थ । देवो वः सविता प्रार्पयतु श्रेष्ठतमाय कर्मणे ॥१॥ १
आप्यायध्वमघ्न्या इन्द्राय भागं प्रजावतीरनमीवा अयक्ष्मा । मा वं स्तेन ईशत माघशंꣳसः ॥२॥ २
ध्रुवा अस्मिन् गोपतौ स्यात बह्वीः । यजमानस्य पशून् पाहि वसोः पवित्रमसि ॥३॥ (१) ३

द्यौरसि पृथिव्यसि मातरिश्वनो घर्मोऽसि । विश्वधा असि परमेण धाम्ना ॥१॥ ४
दृꣳहस्व मा ह्वार्मा ते यज्ञपतिर्ह्वार्षीत् ।
वसोः पवित्रमसि शतधारं वसोः पवित्रमसि सहस्रधारम् ॥२॥ ५
देवस्त्वा सविता पुनातु वसोः पवित्रेण शतधारेण । सुप्वा कामधुक्षः ॥३॥ ६
सा विश्वायुः सा विश्वकर्मा सा विश्वधायाः ।
इन्द्रस्य त्वा भागꣳ सोमेनातनच्मि विष्णो हव्यꣳ रक्षस्व ॥४॥ (२) ७

अग्ने व्रतपते व्रतं चरिष्यामि तच्छकेयं तन्मे राध्यताम् । इदमहमनृतात् सत्यमुपैमि ॥१॥ ८
कस्त्वा युनक्ति स त्वा युनक्ति कस्मै त्वा युनक्ति तस्मै त्वा युनक्ति । कर्मणे वां वेषाय वाम् ॥२॥ ९
प्रत्युष्टꣳ रक्षः प्रत्युष्टा अरातयो निष्टप्तꣳ रक्षो निष्टप्ता अरातयः । उर्वन्तरिक्षमन्वेमि ॥३॥ १०
धूरसि धूर्व धूर्वन्तं धूर्व तं योऽस्मान् धूर्वति । धूर्व तं यं वयं धूर्वामः ॥४॥ ११
देवानामसि सस्नितमं वह्नितमं पप्रितमं जुष्टतमं देवहूतमम् ।
अह्रुतमसि हविर्धानं दृꣳहस्व मा ह्वार्मा ते यज्ञपतिर्ह्वार्षीत् ॥५॥ १२
विष्णुस्त्वा क्रमतामुरु वातायापहतꣳ रक्षो यच्छन्तां पञ्च ।
देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्याम् ॥६॥ १३
अग्नये जुष्टं गृह्णाम्यग्नीषोमाभ्यां जुष्टं गृह्णामि । भूताय त्वा नारातये स्वरभिविख्येषम् ॥७॥ १४ [१४]

दृꣳहन्तां दुर्याः पृथिव्यामुर्वन्तरिक्षमन्वेमि ।
पृथिव्यास्त्वा नाभौ सादयाम्यदित्या उपस्थे । अग्ने हव्यꣳ रक्षस्व ॥८॥ (३) १५

पवित्रे स्थो वैष्णव्यौ सवितुर्वः प्रसव उत्पुनामि । अछिद्रेण पवित्रेण सूर्यस्य रश्मिभिः ॥१॥ १६
देवीरापो अग्रेगुवो अग्रेपुवः । अग्र इममद्य यज्ञं नयत सुधातुं यज्ञपतिं देवायुवम् ॥२॥ १७
युष्मा इन्द्रोऽवृणीत वृत्रतूर्ये यूयमिन्द्रमवृणीध्वं वृत्रतूर्ये प्रोक्षिता स्थ ।
अग्नये त्वा जुष्टं प्रोक्षाम्यग्नीषोमाभ्यां त्वा जुष्टं प्रोक्षामि ॥३॥ १८
दैव्याय कर्मणे शुन्धध्वं देवयज्यायै । यद्वोऽशुद्धः पराजघानेदं वस्तच्छुन्धामि ॥४॥(४)१९

शर्मास्यवधूतꣳ रक्षोऽवधूता अरातयः । अदित्यास्त्वगसि प्रति त्वादितिर्वेत्तु ॥१॥ २०
अद्रिरसि वानस्पत्यो ग्रावासि पृथुबुध्नः । प्रति त्वादित्यास्त्वग्वेत्तु ॥२॥ २१
अग्नेस्तनूरसि वाचो विसर्जनम् । देववीतये त्वा गृह्णामि ॥३॥ २२
बृहन् ग्रावासि वानस्पत्यः स इदं देवेभ्यः । हव्यꣳ शमीष्व सुशमि शमीष्व हविष्कृदेहि ॥४॥ २३
कुक्कुटोऽसि मधुजिह्व इषमूर्जमावद । वयꣳ संघातं संघातं जेष्म ॥५॥ २४
वर्षवृद्धमसि प्रति त्वा वर्षवृद्धं वेत्तु । परापूतꣳ रक्षः परापूता अरातयः ॥६॥ २५
अपहतꣳ रक्षो वायुर्वो विविनक्तु ।
देवो वः सविता प्रतिगृह्णातु हिरण्यपाणिरछिद्रेण पाणिना ॥७॥ (५) २६

धृष्टिरस्यपाग्ने अग्निमामादं जहि । निष्क्रव्यादꣳ सेधा देवयजं वह ॥१॥ २७
ध्रुवमसि पृथिवीं दृꣳह ॥
ब्रह्मवनि त्वा क्षत्रवनि सजातवन्युपदधामि द्विषतो वधाय ॥२॥ २८
अग्ने ब्रह्म गृभ्णीष्व धरुणमस्यन्तरिक्षं दृꣳह ।
ब्रह्मवनि त्वा क्षत्रवनि सजातवन्युपदधामि द्विषतो वधाय ।
धर्त्रमसि दिवं दृꣳह । ब्रह्मवनि त्वा क्षत्रवनि सजातवन्युपदधामि द्विषतो वधाय ॥३॥ २९
विश्वाभ्यस्त्वाशाभ्य उपदधामि द्विषतो वधाय ।
चित स्थोर्ध्वचितो भृगूणामङ्गिरसां तपसा तप्यध्वम् ॥४॥ (६) ३०

शर्मास्यवधूतꣳ रक्षोऽवधूता अरातयः । अदित्यास्त्वगसि प्रति त्वादितिर्वेत्तु ॥१॥ ३१
धिषणासि पर्वती प्रति त्वादित्यास्त्वग्वेत्तु ।
दिवस्कम्भनीरसि धिषणासि पार्वतेयी प्रति त्वा पर्वती वेत्तु ॥२॥ ३२ [११]

धान्यमसि धिनुहि देवान् धिनुहि यज्ञं धिनुहि यज्ञपतिम् । धिनुहि माँ यज्ञन्यम् ॥३॥ ३३
प्राणाय त्वोदानाय त्वा व्यानाय त्वा । दीर्घामनु प्रसितिमायुषे धां ।
देवो वः सविता प्रतिगृह्णातु हिरण्यपाणिरच्छिद्रेण पाणिना । चक्षुषे त्वा महीनां पयोऽसि ॥४॥ ३४
वेदोऽसि वेद येन त्वं देव वेद देवेभ्यो वेदोऽभवः । तेन मह्यं वेदो भव ॥५॥(७) ३५

देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्याम् ।
सं वपामि समाप ओषधीभिः समोषधयो रसेन ।
सꣳ रेवतीर्जगतीभिः सं मधुमतीर्मधुमतीभिः पृच्यन्ताम् ।
जनयत्यै त्वा सं यौमि ॥१॥ ३६
इदमग्नेरिदमग्नीषोमयोरिषे त्वा । घर्मोऽसि विश्वायुरुरुप्रथा उरु प्रथस्वोरु ते यज्ञपतिः प्रथताम् ॥२॥ ३७
अग्निष्टे त्वचं मा हिꣳसीद्देवस्त्वा सविता श्रपयतु वर्षिष्ठेऽधि नाके ॥३॥ ३८
मा भेर्मा सं विक्था अतमेरुर्यज्ञोऽतमेरुर्यजमानस्य प्रजा भूयात् ॥
त्रिताय त्वा द्विताय त्वैकताय त्वा ॥४॥(८) ३९

देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्याम् । आददेऽध्वरकृतं देवेभ्यः ।
इन्द्रस्य बाहुरसि दक्षिणः सहस्रभृष्टिः शततेजाः । वायुरसि तिग्मतेजा द्विषतो वधः ॥१॥ ४०
पृथिव्यै वर्मासि पृथिवि देवयजनि । ओषध्यास्ते मूलं मा हिꣳसिषम् ॥२॥ ४१
व्रजं गच्छ गोष्ठानं वर्षतु ते द्यौर्बधान देव सवितः परमस्यां पृथिव्याꣳ शतेन पाशैः ।
योऽस्मान् द्वेष्टि यं च वयं द्विष्मस्तमतो मा मौक् ॥३॥ ४२
अपाररुं वध्यासं पृथिव्यै देवयजनात् ।
व्रजं गच्छ गोष्ठानं वर्षतु ते द्यौर्बधान देव सवितः परमस्यां पृथिव्याꣳ शतेन पाशैः ।
योऽस्मान् द्वेष्टि यं च वयं द्विष्मस्तमतो मा मौक् । अररो दिवं मा पप्तो द्रप्सस्ते द्यां मा स्कन् ।
व्रजं गच्छ गोष्ठानं वर्षतु ते द्यौर्बधान देव सवितः परमस्यां पृथिव्याꣳ शतेन पाशैः ।
योऽस्मान् द्वेष्टि यं च वयं द्विष्मस्तमतो मा मौक् ॥४॥ ४३
गायत्रेण त्वा छन्दसा परिगृह्णामि त्रैष्टुभेन त्वा छन्दसा परिगृह्णामि जागतेन त्वा छन्दसा परिगृह्णामि ।
सुक्ष्मा चासि शिवा चासि स्योना चासि सुषदा चासि । ऊर्जस्वती चासि पयस्वती च ॥५॥ ४४
उदीरतामवर उत्परास उन्मध्यमाः पितरः सोम्यासः ।
असुं य ईयुरवृका ऋतज्ञास्ते नोऽवन्तु पितरो हवेषु ॥१॥ ५१

त्वᳪ सोम प्रचिकितो मनीषा त्वᳪ रजिष्ठमनु नेषि पन्थाम् ।
तव प्रणीती पितरो न इन्दो देवेषु रत्नमभजन्त धीराः ॥२॥ ५२

त्वया हि नः पितरः सोम पूर्वे कर्माणि चक्रुः पवमान धीराः ।
वन्वन्नवातः परिधीᳪरपोर्णु वीरेभिरश्वैर्मघवा भवा नः ॥३॥ ५३

त्वᳪ सोमᳪ पितृभिः संविदानोऽनु द्यावापृथिवी आ ततन्थ ।
तस्मै त इन्दो हविषा विधेम वयᳪ स्याम पतयो रयीणाम् ॥४॥ ५४

बर्हिषदः पितर ऊत्यर्वागिमा वो हव्या चकृमा जुषध्वम् ।
त आ गतावसा शन्तमेनाथा नः शं योररपो दधात ॥५॥ ५५ [११२८]

उपहूताः पितरः सोम्यासो बर्हिष्येषु निधिषु प्रियेषु ।
त आ गमन्तु त इह श्रुवन्त्वधि ब्रुवन्तु तेऽवन्त्वस्मान् ॥६॥ ५६
आहं पितॄन्त्सुविदत्राँ२ अवित्सि नपातं च विक्रमणं च विष्णोः ।
बर्हिषदो ये स्वधया सुतस्य भजन्त पित्वस्त इहागमिष्ठाः ॥७॥ ५७
अग्निष्वात्ताः पितर एह गच्छत सदःसदः सदत सुप्रणीतयः ।
अत्ता हवीꣳषि प्रयतानि बर्हिष्यथा रयिꣳ सर्ववीरं दधातन ॥८॥ ५८
आ यन्तु नः पितरः सोम्यासोऽग्निष्वात्ताः पथिभिर्देवयानैः
अस्मिन् यज्ञे स्वधया मदन्तोऽधि ब्रुवन्तु तेऽवन्त्वस्मान् ॥९॥ ५९
ये अग्निष्वात्ता ये अनग्निष्वात्ता मध्ये दिवः स्वधया मादयन्ते ।
तेभ्यः स्वराळसुनीतिमेतां यथावशं तन्वं कल्पयाति ॥१०॥ ६०
अग्निष्वात्तानृतुमतो हवामहे नाराशꣳसे सोमपीथं य आशुः ।
ते नो विप्रासः सुहवा भवन्तु वयꣳ स्याम पतयो रयीणाम् ॥११॥ ६१
आच्या जानु दक्षिणतो निषद्येमं यज्ञमभि गृणीत विश्वे ।
मा हिꣳसिष्ट पितरः केन चिन्नो यद्व आगः पुरुषता कराम ॥१२॥ ६२
आसीनासो अरुणीनामुपस्थे रयिं धत्त दाशुषे मर्त्याय ।
पुत्रेभ्यः पितरस्तस्य वस्वः प्र यच्छत त इहोर्जं दधात ॥१३॥ ६३
यमग्ने कव्यवाहन त्वं चिन्मन्यसे रयिम् । तन्नो गीर्भिः श्रवाय्यं देवत्रा पनया युजम् ॥१४॥ ६४
यो अग्निः कव्यवाहनः पितॄन्यक्षदृतावृधः । प्रेदु हव्यानि वोचति देवेभ्यश्च पितृभ्य आ॥१५॥६५
त्वमग्न ईळितो जातवेदो वाड्ढव्यानि सुरभीणि कृत्वी ।
प्रादाः पितृभ्यः स्वधया ते अक्षन्नद्धि त्वं देव प्रयता हवीꣳषि ॥१६॥ ६६
इदं पितृभ्यो नमो अस्त्वद्य ये पूर्वासो य उपरास ईयुः ।
ये पार्थिवे रजस्या निषत्ता ये वा नूनꣳ सुवृजनासु विक्षु ॥१७॥ ६७
ये चेह पितरो ये च नेह याꣳश्च विद्म याँ२ उ च न प्रविद्म ।
त्वं वेत्थ यति ते जातवेदः स्वधाभिर्यज्ञꣳ सुकृतं जुषस्व ॥१८॥ ६८
अधा यथा नः पितरः परासः प्रत्नासो अग्न ऋतमाशुषाणाः ।
शुचीदयन्दीधितिमुक्थशासः क्षामा भिन्दन्तो अरुणीरप व्रन् ॥१९॥ ६९
उशन्तस्त्वा नि धीमह्युशन्तः समिधीमहि ।
उशन्नुशत आ वह पितॄन् हविषे अत्तवे ॥२०॥ ७० [१०४३]

*

अपां फेनेन नमुचेः शिर इन्द्रोदवर्तयः । विश्वा यदजय स्पृधः ॥२१॥ (४) ७१

सोमो राजामृतꣳ सुत ऋजीषेणाजहान्मृत्युम् ।
ऋतेन सत्यमिन्द्रियं विपानꣳ शुक्रमन्धस इन्द्रस्येन्द्रियमिदं पयोऽमृतं मधु ॥१॥ ७२
अद्भ्यः क्षीरं व्यपिबत् क्रुङ्ङाङ्गिरसो धिया ।
ऋतेन सत्यमिन्द्रियं विपानꣳ शुक्रमन्धस इन्द्रस्येन्द्रियमिदं पयोऽमृतं मधु ।
सोममद्भ्यो व्यपिबच्छन्दसा हꣳसः शुचिषत् ।
ऋतेन सत्यमिन्द्रियं विपानꣳ शुक्रमन्धस इन्द्रस्येन्द्रियमिदं पयोऽमृतं मधु ।
अन्नात्परिस्रुतो रसं ब्रह्मणा व्यपिबत् क्षत्रं पयः सोमं प्रजापतिः ।
ऋतेन सत्यमिन्द्रियं विपानꣳ शुक्रमन्धस इन्द्रस्येन्द्रियमिदं पयोऽमृतं मधु ॥२॥ ७३
रेतो मूत्रं वि जहाति योनिं प्रविशदिन्द्रियम् ।
गर्भो जरायुणावृत उल्बं जहाति जन्मना ।
ऋतेन सत्यमिन्द्रियं विपानꣳ शुक्रमन्धस इन्द्रस्येन्द्रियमिदं पयोऽमृतं मधु ॥३॥ ७४
दृष्ट्वा रूपे व्याकरोत् सत्यानृते प्रजापतिः ।
अश्रद्धामनृते दधाच्छ्रद्धाꣳ सत्ये प्रजापतिः ।
ऋतेन सत्यमिन्द्रियं विपानꣳ शुक्रमन्धस इन्द्रस्येन्द्रियमिदं पयोऽमृतं मधु ॥४॥ ७५
वेदेन रूपे व्यपिबत् सुतासुतौ प्रजापतिः ।
ऋतेन सत्यमिन्द्रियं विपानꣳ शुक्रमन्धस इन्द्रस्येन्द्रियमिदं पयोऽमृतं मधु ।
दृष्ट्वा परिस्रुतो रसꣳ शुक्रेण शुक्रं व्यपिबत्पयः सोमं प्रजापतिः ।
ऋतेन सत्यमिन्द्रियं विपानꣳ शुक्रमन्धस इन्द्रस्येन्द्रियमिदं पयोऽमृतं मधु ॥५॥ (५) ७६

सीसेन तन्त्रं मनसा मनीषिण ऊर्णासूत्रेण कवयो वयन्ति ।
अश्विना यज्ञꣳ सविता सरस्वतीन्द्रस्य रूपं वरुणो भिषज्यन् ॥१॥ ७७
तदस्य रूपममृतꣳ शचीभिस्तिस्रो दधुर्देवताः सꣳरराणाः ।
लोमानि शष्पैर्बहुधा न तोक्मभिस्त्वगस्य माꣳसमभवन्न लाजाः ॥२॥ ७८
तदश्विना भिषजा रुद्रवर्तनी सरस्वती वयति पेशो अन्तरम् ।
अस्थि मज्जानं मासरैः कारोतरेण दधतो गवां त्वचि ॥३॥ ७९
सरस्वती मनसा पेशलं वसु नासत्याभ्यां वयति दर्शतं वपुः ।
रसं परिस्रुता न रोहितं नग्नहुर्धीरस्तसरं न वेम ॥४॥ ८०. [१२५३]

पयसा शुक्रममृतं जनित्रꣳ सुरया मूत्राज्जनयन्त रेतः ।
अपामतिं दुर्मतिं बाधमाना ऊवध्यं वातꣳ सब्वं तदारात् ॥५॥ ८१
इन्द्रः सुत्रामा हृदयेन सत्यं पुरोळाशेन सविता जजान ।
यकृत् क्लोमानं वरुणो भिषज्यन् मतस्ने वायव्यैर्न मिनाति पित्तम् ॥६॥ ८२
आन्त्राणि स्थालीर्मधु पिन्वमाना गुदाः पात्राणि सुदुघा न धेनुः ।
श्येनस्य पत्रं न प्लीहा शचीभिरासन्दी नाभिरुदरं न माता ॥७॥ ८३
कुम्भो वनिष्ठुर्जनिता शचीभिर्यस्मिन्नग्रे योन्यां गर्भो अन्तः ।
प्लाशिर्व्यक्तः शतधार उत्सो दुहे न कुम्भी स्वधां पितृभ्यः ॥८॥ ८४
मुखꣳ सदस्य शिर इत् सतेन जिह्वा पवित्रमश्विनासन्त्सरस्वती ।
चप्यं न पायुर्भिषगस्य वालो वस्तिर्न शेपो हरसा तरस्वी ॥९॥ ८५
अश्विभ्यां चक्षुरमृतं ग्रहाभ्यां छागेन तेजो हविषा शृतेन ।
पक्ष्माणि गोधूमैः कुवलैरुतानि पेशो न शुक्रमसितं वसाते ॥१०॥ ८६
अविर्न मेषो नसि वीर्याय प्राणस्य पन्था अमृतो ग्रहाभ्याम् ।
सरस्वत्युपवाकैर्व्यानं नस्यानि बर्हिर्बदरैर्जजान ॥११॥ ८७
इन्द्रस्य रूपमृषभो बलाय कर्णाभ्याꣳ श्रोत्रममृतं ग्रहाभ्याम् ।
यवा न बर्हिर्भ्रुवि केसराणि कर्कन्धु जज्ञे मधु सारघं मुखात् ॥१२॥ ८८
आत्मन्नुपस्थे न वृकस्य लोम मुखे श्मश्रूणि न व्याघ्रलोम ।
केशा न शीर्षन्यशसे श्रियै शिखा सिꣳहस्य लोम त्विषिरिन्द्रियाणि ॥१३॥ ८९
अङ्गान्यात्मन् भिषजा तदश्विनात्मानमङ्गैः समधात् सरस्वती ।
इन्द्रस्य रूपꣳ शतमानमायुश्चन्द्रेण ज्योतिरमृतं दधानाः ॥१४॥ ९०
सरस्वती योन्यां गर्भमन्तरश्विभ्यां पत्नी सुकृतं बिभर्ति ।
अपाꣳ रसेन वरुणो न साम्नेन्द्रꣳ श्रियै जनयन्नप्सु राजा ॥१५॥ ९१
तेजः पशूनाꣳ हविरिन्द्रियावत् परिस्रुता पयसा सारघं मधु ।
अश्विभ्यां दुग्धं भिषजा सरस्वत्या सुतासुताभ्याममृतः सोम इन्दुः ॥१६॥ (६) ९२

क्षत्रस्य नाभिरसि क्षत्रस्य योनिरसि । मा त्वा हिꣳसीन्मा मा हिꣳसीः ।
निषसाद धृतव्रतो वरुणः पस्त्यास्वा । साम्राज्याय सुक्रतुः । मृत्योः पाहि विद्योत्पाहि ।
देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्याम् ॥१॥ ९३ [१०६६]

अश्विनोर्भैषज्येन तेजसे ब्रह्मवर्चसायाभि षिञ्चामि सरस्वत्यै भैषज्येन वीर्यायान्नाद्यायाभि षिञ्चामि ।
इन्द्रस्येन्द्रियेण बलाय श्रियै यशसेऽभि षिञ्चामि ॥२॥ ९४
कोऽसि कतमोऽसि कस्मै त्वा काय त्वा । सुश्लोक सुमङ्गल सत्यराजन् ॥३॥ ९५
शिरो मे श्रीर्यशो मुखं त्विषिः केशाश्च श्मश्रूणि ।
राजा मे प्राणो अमृतꣳ सम्राट् चक्षुर्विराट् श्रोत्रम् ॥४॥ ९६
जिह्वा मे भद्रं वाङ् महो मनो मन्युः स्वराड् भामः ।
मोदाः प्रमोदा अङ्गुलीरङ्गानि मित्रं मे सहः ॥५॥ ९७
बाहू मे बलमिन्द्रियꣳ हस्तौ मे कर्म वीर्यम् । आत्मा क्षत्रमुरो मम ॥६॥ ९८
पृष्ठीर्मे राष्ट्रमुदरमꣳसौ ग्रीवाश्च श्रोणी । ऊरू अरत्नी जानुनी विशो मेऽङ्गानि सर्वतः ॥७॥ ९९
नाभिर्मे चित्तं विज्ञानं पायुर्मेऽपचितिर्भसत् ।
आनन्दनन्दा आण्डौ मे भगः सौभाग्यं पसः ॥८॥ १००
जङ्घाभ्यां पद्भ्यां धर्मोऽसि विशि राजा प्रतिष्ठितः ।
प्रति क्षत्रे प्रति तिष्ठामि राष्ट्रे प्रत्यश्वेषु प्रति तिष्ठामि गोषु ॥९॥ १०१
प्रत्यङ्गेषु प्रति तिष्ठाम्यात्मन् प्रति प्राणेषु प्रति तिष्ठामि पुष्टे ।
प्रति द्यावापृथिव्योः प्रति तिष्ठामि यज्ञे ॥१०॥ १०२
त्रया देवा एकादश त्रयस्त्रिꣳशाः सुराधसः ।
बृहस्पतिपुरोहिता देवस्य सवितुः सवे । देवा देवैरवन्तु मा ॥११॥ १०३
प्रथमा द्वितीयैर्द्वितीयास्तृतीयैस्तृतीयाः सत्येन ।
सत्यं यज्ञेन यज्ञो यजुर्भिर्यजूꣳषि सामभिः ॥१२॥ १०४
सामान्यृग्भिर्ऋचः पुरोऽनुवाक्याभिः पुरोऽनुवाक्या याज्याभिर्याज्या वषट्कारैः ।
वषट्कारा आहुतिभिराहुतयो मे कामान्त्समर्धयन्तु भूः स्वाहा ॥१३॥ १०५
लोमानि प्रयतिर्मम त्वङ् म आनतिरागतिः ।
माꣳसं म उपनतिर्वस्वस्थि मज्जा म आनतिः ॥१४॥७॥ १०६ [११७१]

स्वाद्वीं त्वैकादश ॥११॥ देवा यज्ञं विंशतिः ॥२०॥ सुरावन्तमेकोनविंशतिः ॥१९॥ उदीरतामेकाविंशतिः ॥२१॥
सोमो राजा पञ्च ॥५॥ सीसेन तन्त्रं षोळश ॥१६॥ क्षत्रस्य नाभिश्चतुर्दश ॥ १४ ॥

॥ समानुवाकेषु षडुत्तरशतम् ॥ १०६ ॥

॥ इति शुक्लयजुःकाण्वसंहितायां एकविंशोऽध्यायः ॥ २१ ॥

द्वाविंशोऽध्यायः।

यद्देवा देवहेळनं देवासश्चकृमा वयम् । अग्निर्मा तस्मादेनसो विश्वान्मुञ्चत्वꣳहसः ॥१॥ १
यदि दिवा यदि नक्तमेनांꣳसि चकृमा वयम् ।
वायुर्मा तस्मादेनसो विश्वान्मुञ्चत्वꣳहसः ॥२॥ २
यदि जाग्रद्यदि स्वप्न एनांꣳसि चकृमा वयम् ।
सूर्यो मा तस्मादेनसो विश्वान्मुञ्चत्वꣳहसः ॥३॥ ३
यद् ग्रामे यदरण्ये यत्सभायां यदिन्द्रिये । यच्छूद्रे यदर्ये यदेनश्चकृमा वयम् ।
यदेकस्याधि धर्मणि तस्यावयजनमसि ।
यदापो अघ्न्या इति वरुणेति शपामहे ततो वरुण नो मुञ्च ।
अवभृथ निचुम्पुण निचेरुरसि निचुम्पुणः ।
अव देवैर्देवकृतमेनोऽयक्ष्यव मर्त्यैर्मर्त्यकृतं पुरुराव्णो देव रिषस्पाहि ।
समुद्रे ते हृदयमप्स्वन्तः सं त्वा विशन्त्वोषधीरुतापः ।
सुमित्रिया न आप ओषधयः सन्तु दुर्मित्रियास्तस्मै सन्तु । योऽस्मान्द्वेष्टि यं च वयं द्विष्मः ॥४॥ ४
द्रुपदादिव मुमुचानः स्विन्नः स्नातो मलादिव । पूतं पवित्रेणेवाज्यमापः शुन्धन्तु मैनसः ॥५॥ ५
उद्वयं तमसस्परि स्वः पश्यन्त उत्तरम् । देवं देवत्रा सूर्यमगन्म ज्योतिरुत्तमम् ॥६॥ ६
अपो अद्यान्वचारिषꣳ रसेन समसृक्ष्महि ।
पयस्वानग्न आगमं तं मा सꣳ सृज वर्चसा प्रजया च धनेन च ।
एधोऽस्येधिषीमहि समिदसि तेजोऽसि तेजो मयि धेहि ॥७॥ ७
समाववर्ति पृथिवी समुषाः समु सूर्यः । समु विश्वमिदं जगत् ।
वैश्वानरज्योतिर्भूयासं विभून्कामान्व्यश्नवै भूः स्वाहा ॥८॥ (१) ८

अभ्या दधामि समिधमग्ने व्रतपते त्वयि । व्रतं च श्रद्धां चोपैमीन्धे त्वा दीक्षितो अहम् ॥१॥ ९
यत्र ब्रह्म च क्षत्रं च सम्यञ्चौ चरतः सह । तं लोकं पुण्यं प्रज्ञेषं यत्र देवाः सहाग्निना ॥२॥ १०
यत्रेन्द्रश्च वायुश्च सम्यञ्चौ चरतः सह । तं लोकं पुण्यं प्रज्ञेषं यत्र सेदिर्न विद्यते ॥३॥ ११
अꣳशुना ते अꣳशुः पृच्यतां परुषा परुः । गन्धस्ते सोममवतु मदाय रसो अच्युतः ॥४॥ १२
सिञ्चन्ति परिषिञ्चन्त्युत्सिञ्चन्ति पुनन्ति च । सुरायै बभ्र्वै मदे किन्त्वो वदति किन्त्वः ॥५॥ १३

[११९१]

धानावन्तं करम्भिणमपूपवन्तमुक्थिनम् । इन्द्र प्रातर्जुषस्व नः ॥६॥ १४
बृहदिन्द्राय गायत मरुतो वृत्रहन्तमम् ।
येन ज्योतिरजनयन्नृतावृधो देवं देवाय जागृवि ॥७॥ १५
अध्वर्यो अद्रिभिः सुतꣳ सोमं पवित्र आ नय । पुनीहीन्द्राय पातवे ॥८॥ (२) १६

यो भूतानामधिपतिर्यस्मिँल्लोका अधि श्रिताः ।
य ईशे महतो महाꣳस्तेन गृह्णामि त्वामहं मयि गृह्णामि त्वामहम् ॥१॥ १७
उपयामगृहीतोऽस्यश्विभ्यां त्वा सरस्वत्यै त्वेन्द्राय त्वा सुत्राम्णे ।
एष ते योनिरश्विभ्यां त्वा सरस्वत्यै त्वेन्द्राय त्वा सुत्राम्णे ॥२॥ १८
प्राणपा मे अपानपाश्चक्षुष्पाः श्रोत्रपाश्च मे । वाचो मे विश्वभेषजो मनसोऽसि विलायकः ॥३॥ १९
अश्विनकृतस्य ते सरस्वतिकृतस्येन्द्रेण सुत्राम्णा कृतस्य । उपहूत उपहूतस्य भक्षयामि ॥४॥ (३) २०

समिद्ध इन्द्र उषसामनीके पुरोरुचा पूर्वकृद्वावृधानः ।
त्रिभिर्देवैस्त्रिꣳशता वज्रबाहुर्जघान वृत्रं वि दुरो ववार ॥१॥ २१
नराशꣳसः प्रति शूरो मिमानस्तनूनपात्प्रति यज्ञस्य धाम ।
गोभिर्वपावान्मधुना समञ्जन् हिरण्यैश्चन्द्री यजति प्रचेताः ॥२॥ २२
ईळितो देवैर्हरिवाँ२ अभिष्टिराजुह्वानो हविषा शर्धमानः ।
पुरन्दरो गोत्रभिद्वज्रबाहुरा यातु यज्ञमुप नो जुषाणः ॥३॥ २३
जुषाणो बर्हिर्हरिवान्न इन्द्रः प्राचीनꣳ सीदत्प्रदिशा पृथिव्याः ।
उरुप्रथाः प्रथमानꣳ स्योनमादित्यैरक्तं वसुभिः सजोषाः ॥४॥ २४
इन्द्रं दुरः कवष्यो धावमाना वृषाणं यन्तु जनयः सुपत्नीः ।
द्वारो देवीरभितो वि श्रयन्ताꣳ सुवीरा वीरं प्रथमाना महोभिः ॥५॥ २५
उषासानक्ता बृहती बृहन्तं पयस्वती सुदुघे शूरमिन्द्रम् ।
तन्तुं ततं पेशसा संवयन्ती देवानां देवं यजतः सुरुक्मे ॥६॥ २६
दैव्या मिमाना मनुषः पुरुत्रा होतारा इन्द्रं प्रथमा सुवाचा ।
मूर्धन्यज्ञस्य मधुना दधाना प्राचीनं ज्योतिर्हविषा वृधातः ॥७॥ २७
तिस्रो देवीर्हविषा वर्धमाना इन्द्रं जुषाणा जनयो न पत्नीः ।
अच्छिन्नं तन्तुं पयसा सरस्वतीळा देवी भारती विश्वतूर्तिः ॥८॥ २८ [१३०७]

त्वष्टा दधच्छुष्ममिन्द्राय वृष्णेऽपाकोचिष्टुर्यशसे पुरूणि ।
वृषा यजन्वृषणं भूरिरेता मूर्धन्यज्ञस्य समनक्तु देवान् ॥९॥ २९
वनस्पतिरवसृष्टो न पाशैस्त्मन्या समञ्जञ्छमिता न देवः ।
इन्द्रस्य हव्यैर्जठरं पृणानः स्वदाति यज्ञं मधुना घृतेन ॥१०॥ ३०
स्तोकानामिन्दुं प्रति शूर इन्द्रो वृषायमाणो वृषभस्तुराषाट् ।
घृतप्रुषा मनसा मोदमानाः स्वाहा देवा अमृता मादयन्ताम् ॥११॥ (४) ३१

आ यात्विन्द्रोऽवस उप न इह स्तुतः सधमादस्तु शूरः ।
वावृधानस्तविषीर्यस्य पूर्वीर्द्यौर्न क्षत्रमभिभूति पुष्यात् ॥१॥ ३२
आ न इन्द्रो दूरादा न आसादभिष्टिकृदवसे यासदुग्रः ।
ओजिष्ठेभिर्नृपतिर्वज्रबाहुः संगे समत्सु तुर्वणिः पृतन्यून् ॥२॥ ३३
आ न इन्द्रो हरिभिर्यात्वच्छार्वाचीनोऽवसे राधसे च ।
तिष्ठाति वज्री मघवा विरप्शीमं यज्ञमनु नो वाजसातौ ॥३॥ ३४
त्रातारमिन्द्रमवितारमिन्द्रꣳ हवेहवे सुहवꣳ शूरमिन्द्रम् ।
ह्वयामि शक्रं पुरुहूतमिन्द्रꣳ स्वस्ति नो मघवा धात्विन्द्रः ॥४॥ ३५
इन्द्रः सुत्रामा स्ववाँ२ अवोभिः सुमृळीको भवतु विश्ववेदाः ।
बाधतां द्वेषो अभयं कृणोतु सुवीर्यस्य पतयः स्याम ॥५॥ ३६
तस्य वयꣳ सुमतौ यज्ञियस्यापि भद्रे सौमनसे स्याम ।
स सुत्रामा स्ववाँ२ इन्द्रो अस्मे आराच्चिद् द्वेषः सनुतर्युयोतु ॥६॥ ३७
आ मन्द्रैरिन्द्र हरिभिर्याहि मयूररोमभिः ।
मा त्वा के चिन्नि यमन्विं न पाशिनोऽति धन्वेव ताँ२ इहि ॥७॥ ३८
एवेदिन्द्रं वृषणं वज्रबाहुं वसिष्ठासो अभ्यर्चन्त्यर्कैः ।
स न स्तुतो वीरवद्धातु गोमद्यूयं पात स्वस्तिभिः सदा नः ॥८॥ (५) ३९

समिद्धो अग्निरश्विना तप्तो घर्मो विराट् सुतः ।
दुहे धेनुः सरस्वती सोमꣳ शुक्रमिहेन्द्रियम् ॥१॥ ४०
तनूपा भिषजा सुतेऽश्विनोभा सरस्वती । मध्वा रजाꣳसीन्द्रियमिन्द्राय पथिभिर्वहान् ॥२॥ ४१
इन्द्रायेन्दुꣳ सरस्वती नराशꣳसेन नग्नहुम् ।
अधातामश्विना मधु भेषजं भिषजा सुते ॥३॥ ४२ [१३२१]

आजुह्वाना सरस्वतीन्द्रायेन्द्रियाणि वीर्यम् । इळाभिरश्विना इषꣳ समूर्जꣳ सꣳ रयिं दधुः ॥४॥ ४३
अश्विना नमुचेः सुतꣳ सोमꣳ शुक्रं परिस्रुता । सरस्वती तमा भरद्बर्हिषेन्द्राय पातवे ॥५॥ ४४

कवष्यो न व्यचस्वतीरश्विभ्यां न दुरो दिशः ।
इन्द्रो न रोदसी उभे दुहे कामान्त्सरस्वती ॥६॥ ४५

उषासानक्तमश्विना दिवेन्द्रꣳ सायमिन्द्रियैः । संजानाने सुपेशसा समञ्जाते सरस्वत्या ॥७॥ ४६

पातं नो अश्विना दिवा पाहि नक्तꣳ सरस्वति ।
दैव्या होतारा भिषजा पातमिन्द्रꣳ सचा सुते ॥८॥ ४७

तिस्रस्त्रेधा सरस्वत्यश्विना भारतीळा । तीव्रं परिस्रुता सोममिन्द्राय सुषुवुर्मदम् ॥९॥ ४८
अश्विना भेषजं मधु भेषजं नः सरस्वती । इन्द्रे त्वष्टा यशः श्रियꣳ रूपꣳरूपमधुः सुते ॥१०॥ ४९
ऋतुथेन्द्रो वनस्पतिः शशमानः परिस्रुता । कीलालमश्विभ्यां मधु दुहे धेनुः सरस्वती ॥११॥ ५०
गोभिर्न सोममश्विना मासरेण परिस्रुता । समधातꣳ सरस्वत्या स्वाहेन्द्रे सुतं मधु ॥१२॥(६) ५१

अश्विना हविरिन्द्रियं नमुचेर्धिया सरस्वती । आ शुक्रमासुराद्वसु मघमिन्द्राय जभ्रिरे ॥१॥ ५२
यमश्विना सरस्वती हविषेन्द्रमवर्धयन् । स बिभेद वलं मघं नमुचावासुरे सचा ॥२॥ ५३
तमिन्द्रं पशवः सचाश्विनोभा सरस्वती । दधाना अभ्यनूषत हविषा यज्ञ इन्द्रियैः ॥३॥ ५४
य इन्द्र इन्द्रियं दधुः सविता वरुणो भगः । स सुत्रामा हविष्पतिर्यजमानाय सश्चत ॥४॥ ५५
सविता वरुणो दधद्यजमानाय दाशुषे । आदत्त नमुचेर्वसु सुत्रामा बलमिन्द्रियम् ॥५॥ ५६
वरुणः क्षत्रमिन्द्रियं भगेन सविता श्रियम् । सुत्रामा यशसा बलं दधाना यज्ञमाशत ॥६॥ ५७
अश्विना गोभिरिन्द्रियमश्वेभिर्वीर्यं बलम् । हविषेन्द्रꣳ सरस्वती यजमानमवर्धयन् ॥७॥ ५८
ता नासत्या सुपेशसा हिरण्यवर्तनी नरा । सरस्वती हविष्मतीन्द्र कर्मसु नोऽवत ॥८॥ ५९
ता भिषजा सुकर्मणा सा सुदुघा सरस्वती । स वृत्रहा शतक्रतुरिन्द्राय दधुरिन्द्रियम् ॥९॥ ६०
युवꣳ सुराममश्विना नमुचावासुरे सचा । विपिपानाः सरस्वतीन्द्रं कर्मस्वावत ॥१०॥ ६१

पुत्रमिव पितरावश्विनोभेन्द्रावथुः काव्यैर्दꣳसनाभिः ।
यत्सुरामं व्यपिबः शचीभिः सरस्वती त्वा मघवन्नभिष्णक् ॥११॥ ६२
यस्मिन्नश्वास ऋषभास उक्षणो वशा मेषा अवसृष्टास आहुताः ।
कीलालपे सोमपृष्ठाय वेधसे हृदा मतिं जनय चारुमग्नये ॥१२॥ ६३
अहाव्यग्ने हविरास्ये ते स्रुचीव घृतं चम्वीव सोमः ।
वाजसनिꣳ रयिमस्मे सुवीरं प्रशस्तं धेहि यशसं बृहन्तम् ॥१३॥(७) ६४ [१३४३]

अश्विना तेजसा चक्षुः प्राणेन सरस्वती वीर्यम् । वाचेन्द्रो बलेनेन्द्राय दधुरिन्द्रियम् ॥१॥ ६५
गोमदू षु णासत्याश्वावद्यातमश्विना । वर्ती रुद्रा नृपाय्यम् ॥२॥ ६६
न यत्परो नान्तर आदधर्षद्वृषण्वसू । दुःशꣳसो मर्त्यो रिपुः ॥३॥ ६७
ता न आ वोळ्हमश्विना रयिं पिशङ्गसंदृशम् । धिष्ण्या वरिवोविदम् ॥४॥ ६८
पावका नः सरस्वती वाजेभिर्वाजिनीवती । यज्ञं वष्टु धियावसुः ॥५॥ ६९
चोदयित्री सूनृतानां चेतन्ती सुमतीनाम् । यज्ञं दधे सरस्वती ॥६॥ ७०
महो अर्णः सरस्वती प्र चेतयति केतुना । धियो विश्वा वि राजति ॥७॥ ७१
इन्द्रा याहि चित्रभानो सुता इमे त्वायवः । अण्वीभिस्तना पूतासः ॥८॥ ७२
इन्द्रा याहि धियेषितो विप्रजूतः सुतावतः । उप ब्रह्माणि वाघतः ॥९॥ ७३
इन्द्रा याहि तूतुजान उप ब्रह्माणि हरिवः । सुते दधिष्व नश्चनः ॥१०॥ ७४
अश्विना पिबतां मधु सरस्वत्या सजोषसा ।
इन्द्रः सुत्रामा वृत्रहा जुषन्ताꣳ सोम्यं मधु ॥११॥ (८) ७५ [१३५४]

यद्देवा अष्ट ॥ ८ ॥ अभ्यादधामीत्यष्ट ॥ ८ ॥ यो भूतानां चतस्रः ॥ ४ ॥ समिद्ध इन्द्र एकादश ॥ ११ ॥
अयात्वष्ट ॥८॥ समिद्धो अग्निर्द्वादश ॥१२॥ अश्विना हविस्त्रयोदश ॥१३॥ अश्विना तेजसैकादश ॥११॥
॥ अष्टानुवाकेषु पञ्चसप्ततिः ॥ ७५ ॥
॥ इति शुक्लयजुःकाण्वसंहितायां द्वाविंशोऽध्यायः ॥ २२ ॥

अथ त्रयोविंशोऽध्यायः ।

इमं मे वरुण श्रुधी हवमद्या च मृळय । त्वामवस्युरा चके ॥१॥ १
तत्त्वा यामि ब्रह्मणा वन्दमानस्तदा शास्ते यजमानो हविर्भिः ।
अहेळमानो वरुणेह बोध्युरुशꣳस मा न आयुः प्र मोषीः ॥२॥ २
त्वं नो अग्ने वरुणस्य विद्वान् देवस्य हेळो अव यासिसीष्ठाः ।
यजिष्ठो वह्नितमः शोशुचानो विश्वा द्वेषाꣳसि प्र मुमुग्ध्यस्मत् ॥३॥ ३
स त्वं नो अग्नेऽवमो भवोती नेदिष्ठो अस्या उषसो व्युष्टौ ।
अव यक्ष्व नो वरुणꣳ रराणो वीहि मृळीकꣳ सुहवो न एधि ॥४॥ ४
महीमू षु मातरꣳ सुव्रतानामृतस्य पत्नीमवसे हुवेम ।
तुविक्षत्रामजरन्तीमुरूचीꣳ सुशर्माणमदितिꣳ सुप्रणीतिम् ॥५॥ ५ [१३५९]

सुत्रामाणं पृथिवीं द्यामनेहसꣳ सुशर्माणमदितिꣳ सुप्रणीतिम् ।
दैवीं नावꣳ स्वरित्रामनागसमस्रवन्तीमा रुहेमा स्वस्तये ॥६॥ ६

सुनावमा रुहेयमस्रवन्तीमनागसम् । शतारित्राꣳ स्वस्तये ॥७॥ ७

आ नो मित्रावरुणा घृतैर्गव्यूतिमुक्षतम् । मध्वा रजाꣳसि सुक्रतू ॥८॥ ८

प्र बाहवा सिसृतं जीवसे न आ नो गव्यूतिमुक्षतं घृतेन ।
आ मा जने श्रवयतं युवाना श्रुतं मे मित्रावरुणा हवेमा ॥९॥ ९

शं नो भवन्तु वाजिनो हवेषु देवताता मितद्रवः स्वर्काः ।
जम्भयन्तोऽहिं वृकꣳ रक्षाꣳसि सनेम्यस्मद्युयवन्नमीवाः ॥१०॥ १०

ते नो अर्वन्तो हवनश्रुतो हवं विश्वे शृण्वन्तु वाजिनो मितद्रवः ।
सहस्रसा मेधसाता इव त्मना महो ये धनꣳ समिथेषु जभ्रिरे ॥११॥ ११

वाजेवाजेऽवत वाजिनो नो धनेषु विप्रा अमृता ऋतज्ञाः ।
अस्य मध्वः पिबत मादयध्वं तृप्ता यात पथिभिर्देवयानैः ॥१२॥ (१) १२

समिद्धो अग्निः समिधा सुसमिद्धो वरेण्यः । गायत्री छन्द इन्द्रियं त्र्यविर्गौर्वयो दधुः ॥१॥ १३

तनूनपाच्छुचिव्रतस्तनूपाश्च सरस्वती । उष्णिहा छन्द इन्द्रियं दित्यवाड् गौर्वयो दधुः ॥२॥ १४

इळाभिरग्निरीड्यः सोमो देवो अमर्त्यः । अनुष्टुप् छन्द इन्द्रियं पञ्चाविर्गौर्वयो दधुः ॥३॥ १५

सुबर्हिरग्निः पूषण्वान्त्स्तीर्णबर्हिरमर्त्यः । बृहती छन्द इन्द्रियं त्रिवत्सो गौर्वयो दधुः ॥४॥ १६

दुरो देवीर्दिशो महीर्ब्रह्मा देवो बृहस्पतिः ।
पङ्क्तिश्छन्द इहेन्द्रियं तुर्यवाड् गौर्वयो दधुः ॥५॥ १७

उषे यह्वी सुपेशसा विश्वे देवा अमर्त्याः । त्रिष्टुप् छन्द इहेन्द्रियं पष्ठवाड् गौर्वयो दधुः ॥५॥ १८

दैव्या होतारा भिषजेन्द्रेण सयुजा युजा । जगती छन्द इन्द्रियमनड्वान् गौर्वयो दधुः ॥७॥ १९

तिस्र इळा सरस्वती भारती मरुतो विशः । विराट् छन्द इहेन्द्रियं धेनुर्गौर्न वयो दधुः ॥८॥ २०

त्वष्टा तुरीपो अद्भुत इन्द्राग्नी पुष्टिवर्धना । द्विपदा छन्द इन्द्रियमुक्षा गौर्न वयो दधुः ॥९॥ २१

शमिता नो वनस्पतिः सविता प्रसुवन् भगम् ।
ककुप् छन्द इहेन्द्रियं वशा वेहद्वयो दधुः ॥१०॥ २२

स्वाहा यज्ञं वरुणः सुक्षत्रो भेषजं करत् ।
अतिच्छन्दा इन्द्रियं बृहदृषभो गौर्वयो दधुः ॥११॥ (२) २३ [१३७७]

वसन्तेन ऋतुना देवा वसवस्त्रिवृता स्तुताः । रथन्तरेण तेजसा हविरिन्द्रे वयो दधुः ॥१॥ २४
ग्रीष्मेण ऋतुना देवा रुद्राः पञ्चदशे स्तुताः । बृहता यशसा बलꣳ हविरिन्द्रे वयो दधुः ॥२॥ २५
वर्षाभिर्ऋतुनादित्या स्तोमे सप्तदशे स्तुताः ।
वैरूपेण विशौजसा हविरिन्द्रे वयो दधुः ॥३॥ २६
शारदेन ऋतुना देवा एकविꣳश ऋभव स्तुताः ॥
वैराजेन श्रिया श्रियꣳ हविरिन्द्रे वयो दधुः ॥४॥ २७
हेमन्तेन ऋतुना देवास्त्रिणवे मरुत स्तुताः । बलेन शक्वरीः सहो हविरिन्द्रे वयो दधुः ॥५॥ २८
शैशिरेण ऋतुना देवास्त्रयस्त्रिꣳशेऽमृता स्तुताः ।
सत्येन रेवतीः क्षत्रꣳ हविरिन्द्रे वयो दधुः ॥६॥ (३) २९

होता यक्षत्समिधाग्निमिळस्पदेऽश्विनेन्द्रꣳ सरस्वतीमजो धूम्रो न गोधूमैः कुवलैर्भेषजं मधु ।
शष्पैर्न तेज इन्द्रियं पयः सोमः परिस्रुता घृतं मधु व्यन्त्वाज्यस्य होतर्यज ॥१॥ ३०
होता यक्षत्तनूनपात्सरस्वतीमविर्मेषो न भेषजं पथा मधुमता भरन्नश्विनेन्द्राय वीर्यम् ।
बदरैरुपवाकाभिर्भेषजं तोक्मभिः पयः सोमः परिस्रुता घृतं मधु व्यन्त्वाज्यस्य होतर्यज ॥२॥ ३१
होता यक्षन्नराशꣳसं न नग्नहुं पतिꣳ सुरया भेषजं मेषः सरस्वती भिषग्रथो न चन्द्र्यश्विनोर्वपा इन्द्रस्य
वीर्यम् । बदरैरुपवाकाभिर्भेषजं तोक्मभिः पयः सोमः परिस्रुता घृतं मधु व्यन्त्वाज्यस्य होतर्यज ३॥ ३२
होता यक्षदिळेळित आजुह्वानः सरस्वतीमिन्द्रं बलेन वर्धयन्नृषभेण गवेन्द्रियमश्विनेन्द्राय भेषजम् ।
यवैः कर्कन्धुभिर्मधु लाजैर्न मासरं पयः सोमः परिस्रुता घृतं मधु व्यन्त्वाज्यस्य होतर्यज ॥४॥ ३३
होता यक्षद्बर्हिरूर्णम्रदा भिषङ् नासत्या भिषजाश्विनाश्वा शिशुमती भिषग्धेनुः सरस्वती भिषक् ।
दुह इन्द्राय भेषजं पयः सोमः परिस्रुता घृतं मधु व्यन्त्वाज्यस्य होतर्यज ॥५॥ ३४
होता यक्षद्दुरो दिशः कवष्यो न व्यचस्वतीरश्विभ्यां न दुरो दिश इन्द्रो न रोदसी दुघे दुहे धेनुः
सरस्वत्यश्विनेन्द्राय भेषजम् ।
शुक्रं न ज्योतिरिन्द्रियं पयः सोमः परिस्रुता घृतं मधु व्यन्त्वाज्यस्य होतर्यज ॥६॥ ३५
होता यक्षत्सुपेशसोषे नक्तं दिवाश्विना समञ्जाते सरस्वत्या त्विषिमिन्द्रे न भेषजम् ।
श्येनो न रजसा हृदा श्रिया न मासरं पयः सोमः परिस्रुता घृतं मधु व्यन्त्वाज्यस्य होतर्यज ॥७॥ ३६
होता यक्षद्दैव्या होतारा भिषजाश्विनेन्द्रं न जागृवि दिवा नक्तं न भेषजैः ।
शूषꣳ सरस्वती भिषक् सीसेन दुह इन्द्रियं पयः सोमः परिस्रुता
घृतं मधु व्यन्त्वाज्यस्य होतर्यज ॥८॥ ३७ [१३९१]

होता यक्षत्तिस्रो देवीर्न भेषजं त्रयस्त्रिधातवोऽपसो रूपमिन्द्रे हिरण्ययमश्विनेळा न भारती ।
वाचा सरस्वती मह इन्द्राय दुह इन्द्रियं पयः सोमः परिस्रुता
घृतं मधु व्यन्त्वाज्यस्य होतर्यज ॥९॥ ३८
होता यक्षत् सुरेतसमृषभं नर्यापसं त्वष्टारमिन्द्रमश्विना भिषजं
न सरस्वतीमोजो न जूतिरिन्द्रियं वृको न रभसो भिषक् ।
यशः सुरया भेषजꣳ श्रिया न मासरं पयः सोमः
परिस्रुता घृतं मधु व्यन्त्वाज्यस्य होतर्यज ॥१०॥ ३९
होता यक्षद्वनस्पतिꣳ शमितारꣳ शतक्रतुं भीमं न मन्युꣳ राजानं व्याघ्रं नमसाश्विना ।
भामꣳ सरस्वती भिषगिन्द्राय दुह इन्द्रियं पयः सोमः
परिस्रुता घृतं मधु व्यन्त्वाज्यस्य होतर्यज ॥११॥ ४०
होता यक्षदग्निꣳ स्वाहाज्यस्य स्तोकानाꣳ स्वाहा मेदसां
पृथक् स्वाहा छागमश्विभ्याꣳ स्वाहा मेषꣳ सरस्वत्यै ।
स्वाह ऋषभमिन्द्राय सिꣳहाय सहस इन्द्रियꣳ स्वाहाग्निं न भेषजꣳ स्वाहा सोममिन्द्रियम् ।
स्वाहेन्द्रꣳ सुत्रामाणꣳ सवितारं वरुणं भिषजां पतिꣳ स्वाहा वनस्पतिं प्रियं पाथो न भेषजम् ।
स्वाहा देवा आज्यपा जुषाणो अग्निर्भेषजं पयः सोमः
परिस्रुता घृतं मधु व्यन्त्वाज्यस्य होतर्यज ॥१२॥ (४) ४१

होता यक्षदश्विनौ छागस्य वपाया मेदसो जुषेताꣳ हविर्होतर्यज ।
होता यक्षत्सरस्वतीं मेषस्य वपाया मेदसो जुषताꣳ हविर्होतर्यज ।
होता यक्षदिन्द्रमृषभस्य वपाया मेदसो जुषताꣳ हविर्होतर्यज ॥१॥ ४२
होता यक्षदश्विनौ सरस्वतीमिन्द्रꣳ सुत्रामाणमिमे सोमाः
सुरामाणश्छागैर्न मेषैर्ऋषभैः सुताः ।
शष्पैर्न तोक्मभिर्लाजैर्महस्वन्तो मदा मासरेण परिष्कृताः
शुक्राः पयस्वन्तोऽमृताः प्रस्थिता वो मधुश्च्युतस्तानश्विना सरस्वतीन्द्रः
सुत्रामा वृत्रहा जुषन्ताꣳ सोम्यं मधु ।
पिबन्तु मदन्तु व्यन्तु होतर्यज ॥२॥ ४३ [१३१७]

होता यक्षदश्विनौ छागस्य हविष आत्तामद्य मध्यतो मेद उद्भृतं पुरा द्वेषोभ्यः पुरा पौरुषेय्या
गृभः । घस्तां नूनं घासे अज्राणां यवसप्रथमानाꣳ सुमत्क्षराणाꣳ शतरुद्रियाणामग्निष्वात्तानां

पीवोपवसनानाम् । पार्श्वतः श्रोणितः शितामत उत्सादतोऽङ्गादङ्गादवत्तानां करत एवा-
श्विना जुषेतां४ हविर्होतर्यज । होता यक्षत्सरस्वतीं मेषस्य हविष आवयदद्य मध्यतो मेद
उद्भृतं पुरा द्वेषोभ्यः पुरा पौरुषेय्या गृभः । घसन्नूनं घासे अज्राणां यवसप्रथमाना४
सुमत्क्षराणा४ शतरुद्रियाणामग्निष्वात्तानां पीवोपवसनानाम् । पार्श्वतः श्रोणितः शितामत
उत्सादतोऽङ्गादङ्गादवत्तानां करदेव४ सरस्वती जुषतां४ हविर्होतर्यज । होता यक्षदिन्द्रमृष-
भस्य हविष आवयदद्य मध्यतो मेद उद्भृतं पुरा द्वेषोभ्यः पुरा पौरुषेय्या गृभः । घसन्नूनं
घासे अज्राणां यवसप्रथमाना४ सुमत्क्षराणा४ शतरुद्रियाणामग्निष्वात्तानां पीवोपवसनानाम् ।
पार्श्वतः श्रोणितः शितामत उत्सादतोऽङ्गादङ्गादवत्तानां करदेवमिन्द्रो जुषतां४ हविर्होतर्यज
॥३॥ ४४

होता यक्षद्वनस्पतिमभि हि पिष्टतमया रभिष्ठया रशनयाधित ।
यत्राश्विनोश्छागस्य हविषः प्रिया धामानि यत्र सरस्वत्या मेषस्य हविषः
प्रिया धामानि यत्रेन्द्रस्य ऋषभस्य हविषः प्रिया धामानि ।
यत्राग्नेः प्रिया धामानि यत्र सोमस्य प्रिया धामानि यत्रेन्द्रस्य सुत्राम्णः प्रिया धामानि ।
यत्र सवितुः प्रिया धामानि यत्र वरुणस्य प्रिया धामानि यत्र वनस्पतेः प्रिया पाथा४सि ॥
यत्र देवानामाज्यपानां प्रिया धामानि यत्राग्नेर्होतुः प्रिया धामानि ।
तत्रैतान्प्रस्तुत्येवोपस्तुत्येवोपावस्रक्षद्रभीयस इव कृत्वी करदेवं देवो
वनस्पतिर्जुषतां४ हविर्होतर्यज ॥४॥ ४५

होता यक्षदग्नि४ स्विष्टकृतमयाळग्निरश्विनोश्छागस्य हविषः प्रिया धामान्ययाट्
सरस्वत्या मेषस्य हविषः प्रिया धामान्ययाळिन्द्रस्य ऋषभस्य हविषः प्रिया धामानि ।
अयाळग्नेः प्रिया धामान्ययाट् सोमस्य प्रिया धामान्ययाळिन्द्रस्य सुत्राम्णः प्रिया धामानि ।
अयाट् सवितुः प्रिया धामान्ययाड् वरुणस्य प्रिया धामान्ययाड् वनस्पतेः प्रिया पाथा४सि ।
अयाड् देवानामाज्यपानां प्रिया धामानि यक्षदग्नेर्होतुः प्रिया धामानि । यक्षत्स्वं
महिमानमायजतामेज्या इषः कृणोतु सो अध्वरा जातवेदा जुषतां४ हविर्होतर्यज ॥५॥ ४६

देवं बर्हिः सरस्वती सुदेवमिन्द्रे अश्विना ।
तेजो न चक्षुरक्ष्योर्बर्हिषा दधुरिन्द्रियं वसुवने वसुधेयस्य व्यन्तु यज ॥१॥ ४७
देवीर्द्वारो अश्विना भिषजेन्द्रे सरस्वती ।
प्राणं न वीर्यं नसि द्वारो दधुरिन्द्रियं वसुवने वसुधेयस्य व्यन्तु यज ॥२॥ ४८ [१४०२]

देवी उषासा अश्विना सुत्रामेन्द्रे सरस्वती ।
बलं न वाचमास्य उषाभ्यां दधुरिन्द्रियं वसुवने वसुधेयस्य व्यन्तु यज ॥३॥ ४९
देवी जोष्ट्री सरस्वत्यश्विनेन्द्रमवर्धयन् ।
श्रोत्रं न कर्णयोर्यशो जोष्ट्रीभ्यां दधुरिन्द्रियं वसुवने वसुधेयस्य व्यन्तु यज ॥४॥ ५०
देवी ऊर्जाहुती दुघे सुदुघेन्द्रे सरस्वत्यश्विना भिषजावतः ।
शुक्रं न ज्योति स्तनयोराहुती धत्त इन्द्रियं वसुवने वसुधेयस्य व्यन्तु यज ॥५॥ ५१
देवा देवानां भिषजा होतारा इन्द्रमश्विना वषट्कारैः सरस्वती त्विषिं न हृदये मतिम् ।
होतृभ्यां दधुरिन्द्रियं वसुवने वसुधेयस्य व्यन्तु यज ॥६॥ ५२
देवीस्तिस्रस्तिस्रो देवीरश्विनेळा सरस्वती ।
शूषं न मध्ये नाभ्यामिन्द्राय दधुरिन्द्रियं वसुवने वसुधेयस्य व्यन्तु यज ॥७॥ ५३
देव इन्द्रो नराशꣳसस्त्रिवरूथः सरस्वत्याश्विभ्यामीयते रथः ।
रेतो न रूपममृतं जनित्रमिन्द्राय त्वष्टा दधदिन्द्रियाणि वसुधेयस्य व्यन्तु यज ॥८॥ ५४
देवो देवैर्वनस्पतिर्हिरण्यपर्णो अश्विभ्याꣳ सरस्वत्या सुपिप्पल इन्द्राय पच्यते मधु ।
ओजो न जूतिर्ऋषभो न भामं वनस्पतिर्नो दधदिन्द्रियाणि वसुवने वसुधेयस्य व्यन्तु यज ॥९॥ ५५
देवं बर्हिर्वारितीनामध्वरे स्तीर्णमश्विभ्यामूर्णम्रदाः सरस्वत्या स्योनमिन्द्र ते सदः ।
ईशायै मन्युꣳ राजानं बर्हिषा दधुरिन्द्रियं वसुवने वसुधेयस्य व्यन्तु यज ॥१०॥ ५६
देवो अग्निः स्विष्टकृद्देवान्यक्षद्यथायथꣳ होतारा इन्द्रमश्विना
वाचा वाचꣳ सरस्वतीमग्निꣳ सोमꣳ स्विष्टकृत् ।
स्विष्ट इन्द्रः सुत्रामा सविता वरुणो भिषगिष्टो देवो वनस्पतिः स्विष्टा देवा आज्यपाः ।
स्विष्टो अग्निरग्निना होता होत्रे स्विष्टकृद्यशो न दधदिन्द्रियमूर्जमपचितिꣳ स्वधां
वसुवने वसुधेयस्य व्यन्तु यज ॥११॥ ५७
अग्निमद्य होतारमवृणीतायं यजमानः पचन् पक्तीः
पचन् पुरोळाशान् बध्नन्नश्विभ्यां छागꣳ सरस्वत्यै मेषमिन्द्राय ऋषभम् ।
सुन्वन्नश्विभ्याꣳ सरस्वत्या इन्द्राय सुत्राम्णे सुरासोमान् ॥१२॥ ५८
सूपस्था अद्य देवो वनस्पतिरभवदश्विभ्यां छागेन सरस्वत्यै मेषेणेन्द्राय ऋषभेण ।
अक्षꣳस्तान् मेदस्तः प्रति पचतागृभीषतावीवृधन्त पुरोळाशैरपुरश्विना सरस्वतीन्द्रः सुत्रामा
सुरासोमान् ॥ १३॥ ५९ [१४१३]

त्वामुद्य ऋष आर्षेय ऋषीणां नपादवृणीतायं यजमानो बहुभ्य आ संगतेभ्य एष मे देवेषु
वसु वार्यायक्ष्यत इति ।
ता या देवा देव दानान्यदुस्तान्यस्मा आ च शास्वा च गुरस्वेषितश्च होतरसि भद्रवाच्याय
प्रेषितो मानुषः सूक्तवाकाय सूक्ता ब्रूहि ॥१४॥ (६) ६० [१४१४]

इमं मे वरुण द्वादश ॥ १२ ॥ समिद्धो अग्निरेकादश ॥ ११ ॥ वसन्तेन षट् ॥ ६ ॥ होता यक्षद्
द्वादश ॥ १२ ॥ होता यक्षदश्विनौ छागस्य पञ्च ॥५॥ देवं बर्हिश्चतुर्दश ॥ १४ ॥
॥ षडनुवाकेषु षष्टिः ॥ ६० ॥
॥ इति शुक्लयजुःकाण्वसंहितायां त्रयोविंशोऽध्यायः ॥ २३ ॥

अथ चतुर्विंशोऽध्यायः ।

तेजोऽसि शुक्रममृतमायुष्पा आयुर्मे पाहि ।
देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यामा ददे ॥१॥ १
इमामगृभ्णन् रशनामृतस्य पूर्व आयुषि विदथेषु कव्या ।
सा नो अस्मिन्त्सुत आ बभूव ऋतस्य सामन्त्सरमारपन्ती ॥२॥ २
अभिधा असि भुवनमसि यन्तासि धर्ता ।
स त्वमग्निं वैश्वानरꣳ सप्रथसं गच्छ स्वाहाकृतः स्वगा त्वा देवेभ्यः ॥३॥ ३
प्रजापतये ब्रह्मन्नश्वं भन्त्स्यामि देवेभ्यः प्रजापतये तेन राध्यासम् ।
तं बधान देवेभ्यः प्रजापतये तेन राध्नुहि ।
प्रजापतये त्वा जुष्टं प्रोक्षामीन्द्राग्निभ्यां त्वा जुष्टं प्रोक्षामि वायवे त्वा जुष्टं प्रोक्षामि
विश्वेभ्यस्त्वा देवेभ्यो जुष्टं प्रोक्षामि सर्वेभ्यस्त्वा देवेभ्यो जुष्टं प्रोक्षामि ॥४॥ ४
यो अर्वन्तं जिघांꣳसति तमभ्यमीति वरुणः । परो मर्तः परः श्वा ॥५॥ (१) ५

अग्नये स्वाहा सोमाय स्वाहापां मोदाय स्वाहा सवित्रे स्वाहा वायवे स्वाहा विष्णवे स्वाहा ।
इन्द्राय स्वाहा बृहस्पतये स्वाहा मित्राय स्वाहा वरुणाय स्वाहा ॥१॥ (२) ६

हिङ्काराय स्वाहा हिङ्कृताय स्वाहा क्रन्दते स्वाहावक्रन्दाय स्वाहा ।
प्रोथते स्वाहा प्रप्रोथाय स्वाहा गन्धाय स्वाहा घ्राताय स्वाहा ॥१॥ ७
निविष्टाय स्वाहोपविष्टाय स्वाहा संदिताय स्वाहा वल्गते स्वाहा ।
आसीनाय स्वाहा शयानाय स्वाहा स्वपते स्वाहा जाग्रते स्वाहा ॥२॥ ८ [१४२२]

कूजते स्वाहा प्रबुद्धाय स्वाहा विजृम्भमाणाय स्वाहा विचृत्ताय स्वाहा ।
सꣳहानाय स्वाहोपस्थिताय स्वाहायनाय स्वाहा प्रायणाय स्वाहा ॥३॥ ९
यते स्वाहा धावते स्वाहोद्द्रावाय स्वाहोद्द्रुताय स्वाहा ।
शूकाराय स्वाहा शूकृताय स्वाहा निषण्णाय स्वाहोत्थिताय स्वाहा ॥४॥ १०
जवाय स्वाहा बलाय स्वाहा विवर्तमानाय स्वाहा विवृत्ताय स्वाहा ।
विधून्वानाय स्वाहा विधूताय स्वाहा शुश्रूषमाणाय स्वाहा शृण्वते स्वाहा ॥५॥ ११
ईक्षमाणाय स्वाहेक्षिताय स्वाहा वीक्षिताय स्वाहा निमेषाय स्वाहा ।
यदत्ति तस्मै स्वाहा यत्पिबति तस्मै स्वाहा यन्मूत्रं करोति तस्मै स्वाहा
कुर्वते स्वाहा कृताय स्वाहा ॥६॥ (३) १२

तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि । धियो यो नः प्रचोदयात् ॥१॥ १३
हिरण्यपाणिमूतये सवितारमुप ह्वये । स चेत्ता देवता पदम् ॥२॥ १४
देवस्य चेततो महीं प्र सवितुर्हवामहे । सुमतिꣳ सत्यराधसम् ॥३॥ १५
सुष्टुतिꣳ सुमतीवृधो रातिꣳ सवितुरीमहे । प्र देवाय मतीविदे ॥४॥ १६
रातिꣳ सत्पतिं महे सवितारमुप ह्वये । आसवं देववीतये ॥५॥ १७
देवस्य सवितुर्मतिमासवं विश्वदेव्यम् । धिया भगं मनामहे ॥६॥ १८
अग्निꣳ स्तोमेन बोधय समिधानो अमर्त्यम् । हव्या देवेषु नो दधत् ॥७॥ १९
स हव्यवाळमर्त्य उशिग्दूतश्चनोहितः । अग्निर्धिया समृण्वति ॥८॥ २०
तं त्वा घृतस्न ईमहे चित्रभानो स्वर्दृशम् । देवाँ२ आ वीतये वह ॥९॥ २१
अग्निं दूतं पुरो दधे हव्यवाहमुप ब्रुवे । देवाँ२ आ सादयादिह ॥१०॥ (४) २२

अजीजनो हि पवमान सूर्यं विधारे शक्मना पयः । गोजीरया रꣳहमाणः पुरन्ध्या ॥१॥ (५) २३

विभूर्मात्रा प्रभूः पित्राश्वोऽसि हयोऽस्यत्योऽसि मयोऽस्यर्वासि सप्तिरसि वाज्यसि वृषासि नृमणा असि ।
ययुर्नामासि शिशुर्नामास्यादित्यानां पत्वान्विहि ॥१॥ २४
देवा आशापाला एतं देवेभ्योऽश्वं मेधाय प्रोक्षितꣳ रक्षत ।
इह रन्तिरिह रमतामिह धृतिरिह स्वधृतिः स्वाहा ॥२॥ (६) २५

काय स्वाहा कस्मै स्वाहा कतमस्मै स्वाहा ।
स्वाहाधिमाधीताय स्वाहा मनः प्रजापतये स्वाहा चित्तं विज्ञाताय ॥१॥ २६ [१४४०]

अदित्यै स्वाहादित्यै मह्यै स्वाहादित्यै सुमृळीकायै स्वाहा ।
सरस्वत्यै स्वाहा सरस्वत्यै पावकायै स्वाहा सरस्वत्यै बृहत्यै स्वाहा ॥२॥ २७
पूष्णे स्वाहा पूष्णे प्रपथ्याय स्वाहा पूष्णे नरन्धिषाय स्वाहा ।
त्वष्ट्रे स्वाहा त्वष्ट्रे तुरीपाय स्वाहा त्वष्ट्रे पुरुरूपाय स्वाहा ।
विष्णवे स्वाहा विष्णवे निभूयपाय स्वाहा विष्णवे शिपिविष्टाय स्वाहा ॥३॥ २८
विश्वो देवस्य नेतुर्मर्तो वुरीत सख्यम् ।
विश्वो राय इषुध्यति द्युम्नं वृणीत पुष्यसे स्वाहा ॥४॥ (७) २९

आ ब्रह्मन् ब्राह्मणो ब्रह्मवर्चसी जायतामा राष्ट्रे राजन्यः ।
शूर इषव्योऽतिव्याधी महारथो जायताम् ॥१॥ ३०
दोग्ध्री धेनुर्वोळ्हानड्वानाशुः सप्तिः पुरंधिर्योषा ।
जिष्णू रथेष्ठाः सभेयो युवास्य यजमानस्य वीरो जायताम् ॥२॥ ३१
निकामेनिकामे नः पर्जन्यो वर्षतु फलवत्यो न ओषधयः पच्यन्ताम् ।
योगक्षेमो नः कल्पताम् ॥३॥ (८) ३२

प्राणाय स्वाहापानाय स्वाहा व्यानाय स्वाहा ।
चक्षुषे स्वाहा श्रोत्राय स्वाहा वाचे स्वाहा मनसे स्वाहा ॥१॥ (९) ३३

प्राच्यै दिशे स्वाहार्वाच्यै दिशे स्वाहा दक्षिणायै दिशे स्वाहार्वाच्यै दिशे स्वाहा ।
प्रतीच्यै दिशे स्वाहार्वाच्यै दिशे स्वाहोदीच्यै दिशे स्वाहार्वाच्यै दिशे स्वाहा ।
ऊर्ध्वायै दिशे स्वाहार्वाच्यै दिशे स्वाहावाच्यै दिशे स्वाहार्वाच्यै दिशे स्वाहा ॥१॥(१०) ३४

अद्भ्यः स्वाहा वार्भ्यः स्वाहोदकाय स्वाहा तिष्ठन्तीभ्यः स्वाहा
स्रवन्तीभ्यः स्वाहा स्यन्दमानाभ्यः स्वाहा ।
कूप्याभ्यः स्वाहा सूद्याभ्यः स्वाहा धार्याभ्यः
स्वाहार्णवाय स्वाहा समुद्राय स्वाहा सरिराय स्वाहा ॥१॥ (११) ३५

वाताय स्वाहा धूमाय स्वाहाभ्राय स्वाहा मेघाय स्वाहा विद्योतमानाय स्वाहा स्तनयते स्वाहा ।
अवस्फूर्जते स्वाहा वर्षते स्वाहाववर्षते स्वाहोग्रं वर्षते स्वाहा
शीघ्रं वर्षते स्वाहोद्गृह्णते स्वाहोद्गृहीताय स्वाहा ।
प्रुष्णते स्वाहा शीकायते स्वाहा प्रुष्वाभ्यः स्वाहा
ह्रादुनीभ्यः स्वाहा नीहाराय स्वाहा ॥१॥ (१२) ३६ [१४५०]

अग्नये स्वाहा सोमाय स्वाहेन्द्राय स्वाहा पृथिव्यै स्वाहान्तरिक्षाय स्वाहा ।
दिवे स्वाहा दिग्भ्यः स्वाहाशाभ्यः
स्वाहोर्व्यै दिशे स्वाहार्वाच्यै दिशे स्वाहा ॥१॥(१३) ३७

नक्षत्रेभ्यः स्वाहा नक्षत्रियेभ्यः स्वाहाहोरात्रेभ्यः स्वाहार्धमासेभ्यः स्वाहा ।
मासेभ्यः स्वाहा ऋतुभ्यः स्वाहार्तवेभ्यः स्वाहा
संवत्सराय स्वाहा द्यावापृथिवीभ्याᳬ स्वाहा ॥१॥ ३८
चन्द्राय स्वाहा सूर्याय स्वाहा रश्मिभ्यः स्वाहा वसुभ्यः स्वाहा ।
रुद्रेभ्यः स्वाहादित्येभ्यः स्वाहा मरुद्भ्यः स्वाहा विश्वेभ्यो देवेभ्यः स्वाहा ॥२॥(१४) ३९

मूलेभ्यः स्वाहा शाखाभ्यः स्वाहा वनस्पतिभ्यः स्वाहा ।
पुष्पेभ्यः स्वाहा फलेभ्यः स्वाहौषधीभ्यः स्वाहा ॥१॥(१५) ४०

पृथिव्यै स्वाहान्तरिक्षाय स्वाहा दिवे स्वाहा सूर्याय स्वाहा ।
चन्द्राय स्वाहा नक्षत्रेभ्यः स्वाहाद्भ्यः स्वाहौषधीभ्यः स्वाहा ।
वनस्पतिभ्यः स्वाहा परिप्लवेभ्यः स्वाहा चराचरेभ्यः स्वाहा सरीसृपेभ्यः स्वाहा ॥१॥(१६) ४१

असवे स्वाहा वसवे स्वाहा विभुवे स्वाहा विवस्वते स्वाहा ।
गणश्रिये स्वाहा गणपतये स्वाहाभिभुवे स्वाहाधिपतये स्वाहा ॥१॥ ४२
शूषाय स्वाहा सᳬसर्पाय स्वाहा चन्द्राय स्वाहा ज्योतिषे स्वाहा ।
मलिम्लुचाय स्वाहा दिवा पतयते स्वाहा ॥२॥ (१७) ४३

मधवे स्वाहा माधवाय स्वाहा शुक्राय स्वाहा शुचये स्वाहा ।
नभसे स्वाहा नभस्याय स्वाहेषाय स्वाहोर्जाय स्वाहा ।
सहसे स्वाहा सहस्याय स्वाहा तपसे स्वाहा तपस्याय स्वाहाᳬहसस्पतये स्वाहा ॥१॥(१८) ४४

वाजाय स्वाहा प्रसवाय स्वाहापिजाय स्वाहा क्रतवे स्वाहा ।
स्वः स्वाहा मूर्ध्ने स्वाहा व्यश्नुविने स्वाहा ।
आन्त्याय स्वाहान्त्यायनाय स्वाहा भौवनाय स्वाहा
भुवनस्य पतये स्वाहाधिपतये स्वाहा प्रजापतये स्वाहा ॥१॥ (१९) ४५ [१४५९]

आयुर्यज्ञेन कल्पतां स्वाहा प्राणो यज्ञेन कल्पतां स्वाहापानो यज्ञेन कल्पतां स्वाहा
व्यानो यज्ञेन कल्पतां स्वाहा ।
उदानो यज्ञेन कल्पतां स्वाहा समानो यज्ञेन कल्पतां स्वाहा चक्षुर्यज्ञेन कल्पतां स्वाहा
श्रोत्रं यज्ञेन कल्पतां स्वाहा ।
वाग्यज्ञेन कल्पतां स्वाहा मनो यज्ञेन कल्पतां स्वाहात्मा यज्ञेन कल्पतां स्वाहा
पृष्ठं यज्ञेन कल्पतां स्वाहा ।
ब्रह्म यज्ञेन कल्पतां स्वाहा यज्ञो यज्ञेन कल्पतां स्वाहा ज्योतिर्यज्ञेन कल्पतां स्वाहा
स्वर्यज्ञेन कल्पतां स्वाहा ॥१॥ (२०) ४६

एकस्मै स्वाहा द्वाभ्यां स्वाहा शताय स्वाहैकशताय स्वाहा ।
व्युष्ट्यै स्वाहा स्वर्गाय स्वाहा ॥१॥ (२१) ४७ [१४६१]

तेजोऽसि पञ्च ॥५॥ अग्नय एका ॥१॥ हिङ्काराय षट् ॥६॥ तत्सवितुर्दश ॥ १० ॥ अजीजना ह्येका ॥ १ ॥
विभूर्द्वे ॥ २ ॥ काय चतस्रः ॥ ४ ॥ आब्रह्मंस्तिस्रः ॥ ३ ॥ प्राणायैका ॥ १ ॥ प्राच्यायैका ॥ १ ॥
अद्भ्य एका ॥१॥ वातायैका ॥१॥ अग्नय इत्येका ॥१॥ नक्षत्रेभ्यो द्वे ॥२॥ मूलेभ्य एका ॥१॥
पृथिव्या इत्येका ॥१॥ असवे द्वे ॥२॥ मधव एका ॥१॥ वाजायैका ॥ १ ॥
आयुर्यज्ञेनैका ॥१॥ एकस्मा इत्येका ॥१॥
॥ एकविंशत्यनुवाकेषु सप्तचत्वारिंशत् ॥४७॥

॥ इति शुक्लयजुःकाण्वसंहितायां चतुर्विंशोऽध्यायः ॥२४॥

अथ पञ्चविंशोऽध्यायः ।

हिरण्यगर्भः समवर्तताग्रे भूतस्य जातः पतिरेक आसीत् ।
स दाधार पृथिवीं द्यामुतेमां कस्मै देवाय हविषा विधेम ॥१॥ १
उपयामगृहीतोऽसि प्रजापतये त्वा जुष्टं गृह्णाम्येष ते योनिः सूर्यस्ते महिमा ।
यस्तेऽहन्त्संवत्सरे महिमा संबभूव यस्ते वाया अन्तरिक्षे महिमा संबभूव ।
यस्ते दिवि सूर्ये महिमा संबभूव तस्मै ते महिम्ने प्रजापतये स्वाहा देवेभ्यः ॥२॥ (१) २

यः प्राणतो निमिषतो महित्वैक इद्राजा जगतो बभूव ।
य ईशे अस्य द्विपदश्चतुष्पदः कस्मै देवाय हविषा विधेम ॥१॥ ३ [१४६४]

उपयामगृहीतोऽसि प्रजापतये त्वा जुष्टं गृह्णाम्येष ते योनिश्चन्द्रमास्ते महिमा ।
यस्ते रात्रौ संवत्सरे महिमा संबभूव यस्ते पृथिव्यामग्नौ महिमा संबभूव ।
यस्ते नक्षत्रेषु चन्द्रमसि महिमा संबभूव तस्मै ते महिम्ने प्रजापतये देवेभ्यः स्वाहा ।।२।। (२) ४

युञ्जन्ति ब्रध्नमरुषं चरन्तं परि तस्थुषः । रोचन्ते रोचना दिवि ।।१।। ५
युञ्जन्त्यस्य काम्या हरी विपक्षसा रथे । शोणा धृष्णू नृवाहसा ।।२।। ६
यद्वातो अपो अगनीगन्प्रियामिन्द्रस्य तन्वम् ।
एतᳪ स्तोतरनेन पथा पुनरश्वमावर्तयासि नः ।।३।। ७
वसवस्त्वाञ्जन्तु गायत्रेण छन्दसा रुद्रास्त्वाञ्जन्तु त्रैष्टुभेन छन्दसा ।
आदित्यास्त्वाञ्जन्तु जागतेन छन्दसा ।।४।। ८
भूर्भुवः स्वर्लाजी३ञ्छाची३न्यव्ये गव्ये ।
एतदन्नमत्त देवा एतदन्नमद्धि प्रजापते ।।५।। ९
कः स्विदेकाकी चरति क उ स्विज्जायते पुनः ।
किᳪ स्विद्धिमस्य भेषजं किम्वावपनं महत् ।।६।। १०
सूर्य एकाकी चरति चन्द्रमा जायते पुनः ।
अग्निर्हिमस्य भेषजं भूमिरावपनं महत् ।।७।। ११
का स्विदासीत्पूर्वचित्तिः किᳪ स्विदासीद् बृहद्वयः ।
का स्विदासीत्पिलिप्पिला का स्विदासीत्पिशङ्गिला ।।८।। १२
द्यौरासीत्पूर्वचित्तिरश्व आसीद् बृहद्वयः ।
अविरासीत्पिलिप्पिला रात्रिरासीत्पिशङ्गिला ।।९।।(३) १३

वायुष्ट्वा पचतैरवत्वासितग्रीवश्छागैः । न्यग्रोधश्चमसैः शल्मलिर्वृद्ध्या ।।१।। १४
एष स्य राथ्यो वृषा पड्भिश्चतुर्भिरेदगन् । ब्रह्मा कृष्णश्च नोऽवतु नमोऽग्नये ।।२।। १५
सᳪशितो रश्मिना रथः सᳪशितो रश्मिना हयः ।
सᳪशितो अप्स्वप्सुजा ब्रह्मा सोमपुरोगवः ।।३।। १६
स्वयं वाजिᳪस्तन्वं कल्पयस्व स्वयं यजस्व स्वयं जुषस्व ।
महिमा तेऽन्येन न सन्नशे ।।४।। १७
न वा उ एतन्म्रियसे न रिष्यसि देवाँ२ इदेषि पथिभिः सुगेभिः ।
यत्रासते सुकृतो यत्र ते ययुस्तत्र त्वा देवः सविता दधातु ।।५।। १८ [१४७९]

अग्निः पशुरासीत्तेनायजन्त स एतं लोकमजयद्यस्मिन्नग्निः ।
स ते लोको भविष्यति तं जेष्यसि पिबैता अपः ।
वायुः पशुरासीत्तेनायजन्त स एतं लोकमजयद्यस्मिन्वायुः ।
स ते लोको भविष्यति तं जेष्यसि पिबैता अपः ।
सूर्यः पशुरासीत्तेनायजन्त स एतं लोकमजयद्यस्मिन्त्सूर्यः ।
स ते लोको भविष्यति तं जेष्यसि पिबैता अपः ॥६॥ (४) १९

प्राणाय स्वाहापानाय स्वाहा व्यानाय स्वाहा । अम्बे अम्बिकेऽम्बालिके न मा नयति कश्चन ।
ससस्त्यश्वकः सुभद्रिकां काम्पीलवासिनीम् ॥१॥ २०

गणानां त्वा गणपतिꣳ हवामहे प्रियाणां त्वा प्रियपतिꣳ हवामहे ।
निधीनां त्वा निधिपतिꣳ हवामहे वसो मम ॥२॥ २१

आहमजानि गर्भधमा त्वमजासि गर्भधम् । ता उभौ चतुरः पदः संप्रसारयाव ।
स्वर्गे लोके प्रोर्णुवाथाँ वृषा वाजी रेतोधा रेतो दधातु ॥३॥ (५) २२

उत्सक्थ्या अव गुदं धेहि समञ्जिं चारया वृषन् । य स्त्रीणां जीवभोजनः ॥१॥ २३
यकासकौ शकुन्तिकाहलगिति वञ्चति । आहन्ति गभे पसो निगल्गलीति धारका ॥२॥ २४
यकोऽसकौ शकुन्तक आहलगिति वञ्चति ।
विवक्षत इव ते मुखमध्वर्यो मा नस्त्वमभि भाषथाः ॥३॥ २५
माता च ते पिता च तेऽग्रं वृक्षस्य रोहतः ।
प्रतिलामीति ते पिता गभे मुष्टिमतꣳसयत् ॥४॥ २६
माता च ते पिता च तेऽग्रे वृक्षस्य क्रीळतः ।
विवक्षत इव ते मुखं ब्रह्मन्मा त्वं वदो बहु ॥५॥ २७
ऊर्ध्वामेनामुच्छ्रापय गिरौ भारꣳ हरन्निव ।
अथास्यै मध्यमेधताꣳ शीते वाते पुनन्निव ॥६॥ २८
ऊर्ध्वमेनमुच्छ्रयताद्गिरौ भारꣳ हरन्निव ।
अथास्य मध्यमेजतु शीते वाते पुनन्निव ॥७॥ २९
यदस्या अꣳहुभेद्याः कृधु स्थूलमुपातसत् ।
मुष्का इदस्या एजतो गोशफे शकुला इव ॥८॥ ३० [१४९१]

यद्देवासो॑ ल॒लाम॑गुं॒ प्र वि॑ष्टी॒मिन॒मावि॑षुः ।
स॒क्थ्ना दे॑दिश्यते॒ नारी॑ स॒त्यस्या॑क्षि॒भुवो॑ यथा ॥९॥ ३१
यद्ध॑रि॒णो यव॒मत्ति॒ न पु॒ष्टं प॒शु मन्य॑ते ।
शू॒द्रा यदर्य॑जारा॒ न पोषा॑य धनायति ॥१०॥ ३२
यद्ध॑रि॒णो यव॒मत्ति॒ न पु॒ष्टं ब॒हु मन्य॑ते ।
शू॒द्रो यदर्या॑यै जा॒रो न पोष॒मनु॒ मन्यते ॥११॥ ३३
द॒धि॒क्राव्णो॑ अकारिषं जि॒ष्णोरश्व॑स्य वा॒जिनः॑ ।
सु॒र॒भि नो॒ मुखा॑ कर॒त्प्र ण॒ आयू॑ᳪंषि तारिषत् ॥१२॥ (६) ३४

गा॒य॒त्री त्रि॒ष्टुब्जग॑त्यनु॒ष्टुप्प॒ङ्क्त्या स॒ह ।
बृ॒ह॒त्यु॒ष्णिहा॑ क॒कुप्सू॒चीभिः॑ शम्यन्तु त्वा ॥१॥ ३५
द्वि॒प॑दा॒ याश्चतु॑ष्पदास्त्रि॒पदा॒ याश्च॒ षट्प॑दाः ।
विच्छ॑न्दा॒ याश्च॒ सच्छ॑न्दाः सू॒चीभिः॑ शम्यन्तु त्वा ॥२॥ ३६
म॒हाना॑म्न्यो रे॒वत्यो॒ विश्वा॒ आशाः॑ प्र॒भूव॑रीः ।
मैघी॑र्वि॒द्युतो॒ वाचः॑ सू॒चीभिः॑ शम्यन्तु॒ त्वा ॥३॥ ३७
नार्य॑स्ते॒ पत्न्यो॒ लोम॒ विचि॑न्वन्तु मनी॒षया॑ ।
दे॒वानां॒ पत्न्यो॒ दिशः॑ सू॒चीभिः॑ शम्यन्तु त्वा ॥४॥ ३८
र॒ज॒ता हरि॑णीः॒ सीसा॒ युजो॑ युज्यन्ते॒ कर्म॑भिः ।
अश्व॑स्य वा॒जिन॑स्त्व॒चि सिमाः॑ शम्यन्तु॒ शम्य॑न्तीः ॥५॥ ३९
कु॒विद॒ङ्ग यव॑मन्तो॒ यव॑ञ्चि॒द्यथा॒ दान्त्य॑नुपू॒र्वं वि॒यूय॑ ।
इ॒हेहै॑षां कृणुहि॒ भोज॑नानि॒ ये ब॒र्हिषो॒ नम॑ उक्तिं॒ न ज॒ग्मुः ॥६॥ (७) ४०

कस्त्वा छ्य॑ति॒ कस्त्वा॒ विशा॑स्ति॒ कस्ते॒ गात्रा॑णि शम्यति । क उ॑ ते शमि॒ता क॒विः॥१॥४१
ऋ॒तव॑स्त ऋतु॒था पर्व॑ शमि॒तारो॒ वि शा॑सतु ।
सं॒व॒त्सर॒स्य॒ तेज॑सा श॒मीभिः॑ शम्यन्तु त्वा ॥२॥ ४२
अ॒र्ध॒मा॒साः परू॑ᳪंषि ते॒ मासा॒ आ छ्य॑न्तु॒ शम्य॑न्तः ।
अ॒हो॒रा॒त्राणि॑ म॒रुतो॒ विलि॑ष्टᳪं सूदयन्तु ते ॥३॥ ४३
दैव्या॑ अध्व॒र्यव॑स्त्वा छ्यन्तु॒ वि च॑ शासतु ।
गात्रा॑णि पर्व॒शस्ते॒ सिमाः॑ कृण्वन्तु॒ शम्य॑न्तीः ॥४॥ ४४ [१५०५]

द्यौस्ते पृथिव्यन्तरिक्षं वायुश्छिद्रं पृणातु ते ।
सूर्यस्ते नक्षत्रैः सह लोकं कृणोतु साधुया ॥५॥ ४५
शं ते परेभ्यो गात्रेभ्यः शमस्त्ववरेभ्यः ।
शमस्थभ्यो मज्जभ्यः शम्वस्तु तन्वै तव ॥६॥ (८) ४६

कः स्विदेकाकी चरति क उ स्विज्जायते पुनः ।
कि॑ स्विद्धिमस्य भेषजं किम्वावपनं महत् ॥१॥ ४७
सूर्य एकाकी चरति चन्द्रमा जायते पुनः ।
अग्निर्हिमस्य भेषजं भूमिरावपनं महत् ॥२॥ ४८
कि॑ स्वित्सूर्यसमं ज्योतिः कि॑ समुद्रसम॑ सरः ।
कि॑ स्वित्पृथिव्यै वर्षीयः कस्य मात्रा न विद्यते ॥३॥ ४९
ब्रह्म सूर्यसमं ज्योतिर्द्यौः समुद्रसम॑ सरः ।
इन्द्रः पृथिव्यै वर्षीयान् गोस्तु मात्रा न विद्यते ॥४॥ ५०
पृच्छामि त्वा चितये देवसख यदि त्वमत्र मनसा जगन्थ ।
येषु विष्णुस्त्रिषु पदेष्वेष्टस्तेषु विश्वं भुवनमा विवेशा३ ॥५॥ ५१
अपि तेषु त्रिषु पदेष्वस्मि येषु विश्वं भुवनमा विवेश ।
सद्यः पर्यमि पृथिवीमुत द्यामेकेनाङ्गेन दिवो अस्य पृष्ठम् ॥६॥ ५२
केष्वन्तः पुरुष आ विवेश कान्यन्तः पुरुषे अर्पितानि ।
एतद् ब्रह्मन्नुप वह्लामसि त्वा कि॑ स्विन्नः प्रति वोचास्यत्र ॥७॥ ५३
पञ्चस्वन्तः पुरुष आ विवेश तान्यन्तः पुरुषे अर्पितानि ।
एतत्त्वात्र प्रतिमन्वानो अस्मि न मायया भवस्युत्तरो मत् ॥८॥ (९) ५४

का स्विदासीत्पूर्वचित्तिः कि॑ स्विदासीद् बृहद्वयः ।
का स्विदासीत्पिलिप्पिला का स्विदासीत्पिशङ्गिला ॥१॥ ५५
द्यौरासीत्पूर्वचित्तिरश्व आसीद् बृहद्वयः ।
अविरासीत्पिलिप्पिला रात्रिरासीत्पिशङ्गिला ॥२॥ ५६
का ईमरे पिशङ्गिला का ईं कुरु पिशङ्गिला ।
क ईमा स्कन्दमर्षति क ईं पन्थां वि सर्पति ॥३॥ ५७ [१५१८]

अजारे पिशङ्गिला श्वावित्कुरु पिशङ्गिला ।
शश आस्कन्दमर्षत्यहिः पन्थां वि सर्पति ॥४॥ ५८

कत्यस्य विष्ठाः कत्यक्षराणि कति होमासः कतिधा समिद्धः ।
यज्ञस्य त्वा विदथा पृच्छमत्र कति होतार ऋतुशो यजन्ति ॥५॥ ५९

षळस्य विष्ठाः शतमक्षराण्यशीतिर्होमाः समिधो ह तिस्रः ।
यज्ञस्य ते विदथा प्र ब्रवीमि सप्त होतार ऋतुशो यजन्ति ॥६॥ ६०

को अस्य वेद भुवनस्य नाभिं को द्यावापृथिवी अन्तरिक्षम् ।
कः सूर्यस्य वेद बृहतो जनित्रं को वेद चन्द्रमसं यतोजाः ॥७॥ ६१

वेदाहमस्य भुवनस्य नाभिं वेद द्यावापृथिवी अन्तरिक्षम् ।
वेद सूर्यस्य बृहतो जनित्रमथो वेद चन्द्रमसं यतोजाः ॥८॥ ६२

पृच्छामि त्वा परमन्तं पृथिव्याः पृच्छामि यत्र भुवनस्य नाभिः ।
पृच्छामि त्वा वृष्णो अश्वस्य रेतः पृच्छामि वाचः परमं व्योम ॥९॥ ६३

इयं वेदिः परो अन्तः पृथिव्या अयं यज्ञो भुवनस्य नाभिः ।
अयꣳ सोमो वृष्णो अश्वस्य रेतो ब्रह्मायं वाचः परमं व्योम ॥१०॥ ६४

सुभूः स्वयम्भूः प्रथमोऽन्तर्महत्यर्णवे ।
दधे ह गर्भमृत्वियं यतो जातः प्रजापतिः ॥११॥ ६५

होता यक्षत्प्रजापतिꣳ सोमस्य महिम्नः ।
जुषतां पिबतु सोमꣳ होतर्यज ॥१२॥ ६६

प्रजापते न त्वदेतान्यन्यो विश्वा रूपाणि परि ता बभूव ।
यत्कामास्ते जुहुमस्तन्नो अस्तु वयꣳ स्याम पतयो रयीणाम् ॥१३॥(१०) ६७ [१५१८]

हिरण्यगर्भो द्वे ॥ २ ॥ यः प्राणतो द्वे ॥ २ ॥ युञ्जन्ति नव ॥ ९ ॥ वायुष्ट्वा षट् ॥ ६ ॥ प्राणाय तिस्रः ॥ ३ ॥
उत्सक्थ्या द्वादश ॥१२॥ गायत्री षट् ॥६॥ कस्त्वा षट् ॥६॥ कः स्विदष्ट ॥८॥ का स्वित् त्रयोदश ॥ १३ ॥
॥ दशानुवाकेषु सप्तषष्टिः ॥ ६७ ॥

॥ इति शुक्लयजुःकाण्वसंहितायां पञ्चविंशोऽध्यायः ॥ २५ ॥

अथ षड्विंशोऽध्यायः ।

अश्वस्तूपरो गोमृगस्ते प्राजापत्याः कृष्णग्रीव आग्नेयो रराटे ।
पुरस्तात्सारस्वती मेष्यधस्ताद्धन्वोः ॥१॥ १
आश्विना अधोरामौ बाह्वोः सौमापौष्णः श्यामो नाभ्याᳩ सौर्ययामौ ।
श्वेतश्च कृष्णश्च पार्श्वयोः ॥२॥ २
त्वाष्ट्रौ लोमशसक्थौ सक्थ्योर्वायव्यः श्वेतः पुच्छ इन्द्राय स्वपस्याय वेहद्वैष्णवो वामनः ।
रोहितो धूम्ररोहितः कर्कन्धुरोहितस्ते सौम्या बभ्रुररुणबभ्रुः शुकबभ्रुस्ते वारुणाः ॥३॥ ३
शितिरन्ध्रोऽन्यतःशितिरन्ध्रः समन्तशितिरन्ध्रस्ते सावित्राः शितिबाहुरन्यतः
शितिबाहुः समन्तशितिबाहुस्ते बार्हस्पत्याः ।
पृषती क्षुद्रपृषती स्थूलपृषती ता मैत्रावरुण्यः ॥४॥ ४
शुद्धवालः सर्वशुद्धवालो मणिवालस्त आश्विनाः ।
श्येतः श्येताक्षोऽरुणस्ते रुद्राय पशुपतये कर्णायामाः ॥५॥ ५
अवलिप्ता रौद्रा नभोरूपाः पार्जन्याः । पृश्निस्तिरश्चीनपृश्निरूर्ध्वपृश्निस्ते मारुताः ॥६॥ ६
फल्गूर्लोहितोर्णी पलक्षी ताः सारस्वत्यः ।
प्लीहाकर्णः शुण्ठाकर्णोऽध्यालोहकर्णस्ते त्वाष्ट्राः ॥७॥ ७
कृष्णग्रीवः शितिकक्षोऽञ्जिसक्थस्त ऐन्द्राग्नाः ।
कृष्णाञ्जिरल्पाञ्जिर्महाञ्जिस्त उषस्याः ॥८॥ ८
शिल्पा वैश्वदेव्यो रोहिण्यस्त्र्यवयो वाचेऽविज्ञाता अदित्यै ।
सरूपा धात्रे वत्सतर्यो देवानां पत्नीभ्यः ॥९॥ (३) ९

कृष्णग्रीवा आग्नेयाः शितिभ्रवो वसूनाᳩ रोहिता रुद्राणाम् ।
श्वेता अवरोकिण आदित्यानां नभोरूपाः पार्जन्याः ॥१॥ १०
उन्नत ऋषभो वामनस्त ऐन्द्रावैष्णवा उन्नतः शितिबाहुः शितिपृष्ठस्त ऐन्द्राबार्हस्पत्याः ।
शुकरूपा वाजिनाः कल्माषा आग्निमारुताः श्यामाः पौष्णाः ॥२॥ ११
एता ऐन्द्राग्ना द्विरूपा अग्नीषोमीया वामना अनड्वाह आग्नावैष्णवाः ।
वशा मैत्रावरुण्योऽन्यत एन्यो मैत्र्यः ॥३॥ १२
कृष्णग्रीवा आग्नेया बभ्रवः सौम्याः श्वेता वायव्या अविज्ञाता अदित्यै ।
सरूपा धात्रे वत्सतर्यो देवानां पत्नीभ्यः ॥४॥ १३ [१५४१]

कृष्णा भौमा धूम्रा आन्तरिक्षा बृहन्तो दिव्याः ।
शबला वैद्युताः सिध्मास्तारकाः ॥५॥ (२) १४

धूम्रान्वसन्तायालभते श्वेतान्ग्रीष्माय कृष्णान्वर्षाभ्योऽरुणाञ्छरदे ।
पृषतो हेमन्ताय पिशङ्गाञ्छिशिराय ॥१॥ १५
त्र्यवयो गायत्र्यै पञ्चावयस्त्रिष्टुभे दित्यवाहो जगत्यै ।
त्रिवत्सा अनुष्टुभे तुर्यवाह उष्णिहे ॥२॥ १६
पष्ठवाहो विराज उक्षाणो बृहत्या ऋषभाः ककुभे ।
अनड्वाहः पङ्क्त्यै धेनवोऽतिच्छन्दसे ॥३॥ १७
कृष्णग्रीवा आग्नेया बभ्रवः सौम्या उपध्वस्ताः सावित्रा वत्सतर्यः सारस्वत्यः श्यामाः पौष्णाः ।
पृश्नयो मारुता बहुरूपा वैश्वदेवा वशा द्यावापृथिवीयाः ॥४॥ १८
उक्ताः सँचरा एता ऐन्द्राग्नाः ।
कृष्णा वारुणाः पृश्नयो मारुताः कायास्तूपराः ॥५॥ (३) १९

अग्नयेऽनीकवते प्रथमजानालभते मरुद्भ्यः सान्तपनेभ्यः सवात्यान्मरुद्भ्यो गृहमेधिभ्यो बष्किहान् ।
मरुद्भ्यः क्रीळिभ्यः सꣳसृष्टान्मरुद्भ्यः स्वतवद्भ्योऽनुसृष्टान् ॥१॥ २०
उक्ताः सँचरा एता ऐन्द्राग्नाः । प्राशृङ्गा माहेन्द्रा बहुरूपा वैश्वकर्मणाः ॥२॥ २१
धूम्रा बभ्रुनीकाशाः पितॄणाꣳ सोमवतां बभ्रवो धूम्रनीकाशाः पितॄणां बर्हिषदाम् ।
कृष्णा बभ्रुनीकाशाः पितॄणामग्निष्वात्तानां कृष्णाः पृषन्तस्त्रैयम्बकाः ॥३॥ २२
उक्ताः सँचरा एताः शुनासीरीयाः । श्वेता वायव्याः श्वेताः सौर्याः ॥४॥ २३
वसन्ताय कपिञ्जलानालभते ग्रीष्माय कलविङ्कान्वर्षाभ्यस्तित्तिरीञ्छरदे वर्तिकाः ।
हेमन्ताय ककराञ्छिशिराय विककरान् ॥५॥ (४) २४

समुद्राय शिशुमारानालभते पर्जन्याय मण्डूकानद्भ्यो मत्स्यान् ।
मित्राय कुलीपयान्वरुणाय नाक्रान् ॥१॥ २५
सोमाय हꣳसानालभते वायवे बलाका इन्द्राग्निभ्यां क्रुञ्चान् ।
मित्राय मद्गून्वरुणाय चक्रवाकान् ॥२॥ २६
अग्नये कुटरूनालभते वनस्पतिभ्य उलूकानग्नीषोमाभ्यां चाषान् ।
अश्विभ्यां मयूरान्मित्रावरुणाभ्यां कपोतान् ॥३॥ २७ [१५५५]

सोमाय लबानालभते त्वष्ट्रे कौलीकान्गोषादीर्देवानां पत्नीभ्यः ।
कुलीका देवजामिभ्योऽग्नये गृहपतये पारुष्णान् ॥४॥ २८
अह्ने पारावतानालभते रात्र्यै सीचापूरहोरात्रयोः संधिभ्यो जतूः ।
मासेभ्यो दात्यौहान्त्संवत्सराय महतः सुपर्णान् ॥५॥ (५) २९

OSMANIA UNIVERSITY LIBRARY

भूम्या आखूनालभतेऽन्तरिक्षाय पाङ्क्त्रान्दिवे कशान् ।
दिग्भ्यो नकुलान्बभ्रुकानवान्तरदिशाभ्यः ॥१॥ ३०
वसुभ्य ऋश्यानालभते रुद्रेभ्यो रुरूनादित्येभ्यो न्यङ्कून् ।
विश्वेभ्यो देवेभ्यः पृषतान्त्साध्येभ्यः कुलुङ्गान् ॥२॥ ३१
ईशानाय परस्वत आलभते मित्राय गौरान्वरुणाय महिषान् ।
बृहस्पतये गवयाꣳस्त्वष्ट्र उष्ट्रान् ॥३॥ ३२
प्रजापतये पुरुषान् हस्तिन आलभते वाचे प्लुषीन् ।
चक्षुषे मशकाञ्छ्रोत्राय भृङ्गाः ॥४॥ ३३
प्रजापतये च वायवे च गोमृगो वरुणायारण्यो मेषो यमाय कृष्णो मनुष्यराजाय मर्कटः ।
शार्दूलाय रोहिदृषभाय गवयी क्षिप्रश्येनाय वर्तिका नीलङ्गोः क्रिमिः समुद्राय
शिशुमारो हिमवते हस्ती ॥५॥ (६) ३४

मयुः प्राजापत्य उलो हलिक्ष्णो वृषदꣳशस्ते धात्रे दिशां कङ्को धुङ्क्षाग्नेयी ।
कलविङ्को लोहिताहिः पुष्करसादस्ते त्वाष्ट्रा वाचे क्रुञ्चः ॥१॥ ३५
सोमाय कुलुङ्ग आरण्योऽजो नकुलः शका ते पौष्णाः क्रोष्टा मायोरिन्द्रस्य गौरमृगः ।
पिद्वो न्यङ्कुः कक्कटस्तेऽनुमत्यै प्रतिश्रुत्कायै चक्रवाकः ॥२॥ ३६
सौरी बलाका शार्गः सृजयः शयाण्डकस्ते मैत्राः सरस्वत्यै शारिः पुरुषवाक् श्वाविद्भौमी ।
शार्दूलो वृकः पृदाकुस्ते मन्यवे सरस्वते शुकः पुरुषवाक् ॥३॥ ३७
सुपर्णः पार्जन्य आतिर्वाहसो दर्विदा ते वायवे बृहस्पतये वाचस्पतये पैङ्गराजोऽलज आन्तरिक्षः ।
प्लवो मद्गुर्मत्स्यस्ते नदीपतये द्यावापृथिवीयः कूर्मः ॥४॥ ३८
पुरुषमृगश्चन्द्रमसो गोधा कालका दार्वाघाटस्ते वनस्पतीनां कृकवाकुः सावित्रो हꣳसो वातस्य ।
नाक्रो मकरः कुलीपयस्तेऽकूपारस्य ह्रियै शल्यकः ॥५॥ (७) ३९

एण्यह्नो मण्डूको मूषिका तित्तिरिस्ते सर्पाणां लोपाश आश्विनः कृष्णो रात्र्यै ।
ऋक्षो जतूः सुषिलीका त इतरजनानां जहका वैष्णवी ॥१॥ ४० [१५६८]

अन्यवापोऽर्धमासानामृश्यो मयूरः सुपर्णस्ते गन्धर्वाणामपामुद्रो मासां कश्यपः ।
रोहित्कुण्डृणाची गोलत्तिका तेऽप्सरसां मृत्यवेऽसितः ॥३॥ ४१
वर्षाहूर्ऋतूनामाखुः कशो मान्थालस्ते पितॄणां बलायाजगरो वसूनां कपिञ्जलः ।
कपोत उलूकः शशस्ते निर्ऋत्यै वरुणायारण्यो मेषः ॥३॥ ४२
श्वित्र आदित्यानामुष्ट्रो घृणीवान्वार्ध्रीनसस्ते मत्या अरण्याय सृमरो रुरू रौद्रः ।
क्वयिः कुटरुर्दात्यौहस्ते वाजिनां कामाय पिकः ॥४॥ ४३
खङ्गो वैश्वदेवः श्वा कृष्णः कर्णो गर्दभस्तरक्षुस्ते रक्षसामिन्द्राय सूकरः ।
सिꣳहो मारुतः कृकलासः पिप्पका शकुनिस्ते शरव्यायै विश्वेषां देवानां पृषतः॥५॥(८)४४ [१५७१]

अश्वस्तूपरो नव ॥ ९ ॥ कृष्णग्रीवा पञ्च ॥ ५ ॥ धूम्रान्वसन्ताय पञ्च ॥ ५ ॥ अग्नयेऽनीकवते पञ्च ॥ ५ ॥ समुद्राय शिशुमारान् पञ्च ॥ ५ ॥ भूम्या आखून् पञ्च ॥ ५ ॥ मयुः प्राजापत्य पञ्च ॥ ५ ॥ एण्यह्न इति पञ्च ॥ ५ ॥
॥ अष्टानुवाकेषु चतुश्चत्वारिंशत् ॥ ४४ ॥
॥ इति शुक्लयजुःकाण्वसंहितायां षड्विंशोऽध्यायः ॥ २६ ॥

अथ सप्तविंशोऽध्यायः ।

ादं दद्भिरवकां दन्तमूलैर्मृदं बर्स्वैस्तेगान्दꣳष्ट्राभ्याꣳ सरस्वत्या अग्रजिह्वं जिह्वाया उत्सादम् ।
ावक्रन्देन तालु वाजꣳ हनुभ्यामप आस्येन वृषणमाण्डाभ्याम् ॥१॥ १
आदित्यान् श्मश्रुभिः पन्थानं भ्रूभ्यां द्यावापृथिवी वर्तोभ्यां विद्युतं कनीनकाभ्याम् ।
शुक्लाय स्वाहा कृष्णाय स्वाहा पार्याणि पक्ष्माण्यवार्या इक्षवोऽवार्याणि पक्ष्माणि पार्या इक्षवः ॥२॥ (१) २

वातं प्राणेनापानेन नासिके उपयाममधरेणौष्ठेन सदुत्तरेण ।
प्रकाशेनान्तरमनूकाशेन बाह्यं निवेष्यं मूर्ध्ना स्तनयित्नुं निर्बाधेनाशनिं मस्तिष्केण विद्युतं कनीनकाभ्याम् ॥१॥ ३
र्णाभ्याꣳ श्रोत्रꣳ श्रोत्राभ्यां कर्णौ तेदनीमधरकण्ठेनापः शुष्ककण्ठेन चित्तं मन्याभिः ।
ादितिꣳ शीर्ष्णा निर्ऋतिं निर्जर्जल्येन शीर्ष्णा संक्रोशैः प्राणान् रेष्माणꣳ स्तुपेन ॥२॥ (२) ४

मशकान्केशैरिन्द्रꣳ स्वपसा वहेन बृहस्पतिꣳ शकुनिसादेन कूर्मान् ।
शफैराक्रमणꣳ स्थूराभ्यामृक्षलाभिः कपिञ्जलान् ॥१॥ ५ [१५७७]

जवं जङ्घाभ्यामध्वानं बाहुभ्यां जाम्बीलेनारण्यमग्निमतिरुग्भ्याम् ।
पूषणं दोर्भ्यामश्विना अꣳसाभ्याꣳ रुद्रꣳ रोराभ्याम् ॥२॥ (३) ६

अग्नेः पक्षतिर्वायोर्निपक्षतिरिन्द्रस्य तृतीयापां चतुर्थी ।
अदित्यै पञ्चमीन्द्राण्यै षष्ठी मरुताꣳ सप्तमी बृहस्पतेरष्टमी ।
अर्यम्णो नवमी धातुर्दशमीन्द्रस्यैकादशी वरुणस्य द्वादशी यमस्य त्रयोदशी॥१॥ (४) ७

इन्द्राग्न्योः पक्षतिः सरस्वत्यै निपक्षतिर्मित्रस्य तृतीया सोमस्य चतुर्थी ।
निर्ऋत्यै पञ्चम्यग्नीषोमयोः षष्ठी सर्पाणाꣳ सप्तमी विष्णोरष्टमी ।
पूष्णो नवमी त्वष्टुर्दशमीन्द्रस्यैकादशी वरुणस्य द्वादशी यम्यै त्रयोदशी ।
द्यावापृथिव्योर्दक्षिणं पार्श्वं विश्वेषां देवानामुत्तरम् ॥१॥ (५) ८

मरुताꣳ स्कन्धा विश्वेषां देवानां प्रथमा कीकसा रुद्राणां द्वितीयादित्यानां तृतीया वायोः पुच्छ-
मग्नीषोमयोर्भासदौ । क्रुञ्चौ श्रोणिभ्यामिन्द्राबृहस्पती ऊरुभ्यां मित्रावरुणा अल्गाभ्यामाक्रमणꣳ
स्थूराभ्यां बलं कुष्ठाभ्याम् ॥१॥ (६) ९

पूषणं वनिष्ठुनान्धाहीन्त्स्थूलगुदया सर्पान्गुदाभिर्विहुत आन्त्रैरपो वस्तिना वृषणमाण्डाभ्याम् ।
वाजिनꣳ शेपेन प्रजाꣳ रेतसा चाषान्पित्तेन प्रदरान्पायुना कूश्माञ्छकपिण्डैः ॥१॥ (७) १०

इन्द्रस्य क्रोडोऽदित्यै पाजस्यं दिशां जत्रवोऽदित्यै भसत् ।
जीमूतान्हृदयौपशेनान्तरिक्षं पुरीतता ॥१॥ ११
नभ उदर्येण चक्रवाकौ मतस्नाभ्यां दिवं वृक्काभ्यां गिरीन्प्लाशिभिः ।
उपलान्प्लीह्ना वल्मीकान्क्लोमभिर्ग्लौभिर्गुल्मान्हिराभिः स्रवन्तीः ।
ह्रदान्कुक्षिभ्याꣳ समुद्रमुदरेण वैश्वानरं भस्मना ॥२॥ (८) १२

विधृतिं नाभ्या घृतꣳ रसेनापो यूष्णा मरीचीर्विप्रुड्भिर्नीहारमूष्मणा शीनं वसया प्रुष्वा अश्रुभिः ।
ह्रादुनीर्दूषीकाभिरस्ना रक्षाꣳसि चित्राण्यङ्गैर्नक्षत्राणि रूपेण पृथिवीं त्वचा जुम्बकाय
स्वाहा ॥१॥ (९) १३

हिरण्यगर्भः समवर्तताग्रे भूतस्य जातः पतिरेक आसीत् ।
स दाधार पृथिवीं द्यामुतेमां कस्मै देवाय हविषा विधेम ॥१॥ १४
यः प्राणतो निमिषतो महित्वैक इद्राजा जगतो बभूव ।
य ईशे अस्य द्विपदश्चतुष्पदः कस्मै देवाय हविषा विधेम ॥२॥ १५ [१५८७]

यस्येमे हिमवन्तो महित्वा यस्य समुद्रꣳ रसया सहाहुः ।
यस्येमाः प्रदिशो यस्य बाहू कस्मै देवाय हविषा विधेम ॥३॥ १६

य आत्मदा बलदा यस्य विश्व उपासते प्रशिषं यस्य देवाः ।
यस्य छायामृतं यस्य मृत्युः कस्मै देवाय हविषा विधेम ॥४॥ (१०) १७

आ नो भद्राः क्रतवो यन्तु विश्वतोऽदब्धासो अपरीतास उद्भिदः ।
देवा नो यथा सदमिद् वृधे असन्नप्रायुवो रक्षितारो दिवेदिवे ॥१॥ १८

देवानां भद्रा सुमतिर्ऋजूयतां देवानाꣳ रातिरभि नो निवर्त्तताम् ।
देवानाꣳ सख्यमुपसेदिमा वयं देवा न आयुः प्रतिरन्तु जीवसे ॥२॥ १९

